स्वातन्त्र्यस्य पञ्चसप्ततितमः संवत्सरः

**स्वतन्त्रतायाः अमृतमहोत्सवः**



**[illegible]-[illegible]संयुक्ताङ्के भवतां समेषां मङ्गलाभिनन्दनम्।**

| | |
|---|---|
| मुख्यसम्पादकः | विद्यावाचस्पति श्री सदानन्दझा: |
| सम्पादकः | डा. सुमन के. एस्, डा. विपिनकुमारझा: |
| पुनर्वीक्षकः | डा. प्रीतिवर्मा, डा. दीपिकादीक्षितः, [illegible] |
| विशिष्टपुनर्वीक्षकः | प्रो. पीयूषकान्तदीक्षितः, प्रो. [illegible] |
| प्रकाशनम् | सारस्वत-निकेतनम् |
| लोकार्पणकर्ता | श्रीमान् गोविन्द सिंह ठाकुर, शिक्षामन्त्री, हिमाचलप्रदेशः |
| लोकार्पणतिथिः | 09.08.2022, 8:00 PM |
| लोकार्पणपद्धतिविधिः | [illegible] |
| तकनीकीविशेषज्ञ[illegible]सहायकः | श्रीमनीषकुमारमिश्रः<br>सिग्मा वेब होस्टिंग, बंगलोर |

[illegible]






# विषयानुक्रमणिका


| Sl. | शीर्षकम् | लेखकः |
|---|---|---|
| मुख्यसम्पादकीयम् | | डॉ. सदानन्द झाः |
| प्रकाशकीयम् | | डॉ. बिपिनकुमारझाः |
| 1 | आलयविज्ञान' का विवेचन- बौद्ध धर्म के सन्दर्भ में | डॉ. सोनल सिंह |
| 2 | सिद्धान्तकौमुद्याः रत्नार्णवटीकायाः समीक्षात्मकः परिचयः | राजेशचन्द्रः पोखरियाः |
| 3 | पुराणकाले नारीणां पाणिग्रहणसंस्कारः | डॉ. दीपिका दीक्षितः |
| 4 | Study Of Palāśa Plant on Indian Perspective | Dr Ishwara Prasad A |
| 5 | भारतीयज्ञानपरम्परायां शिक्षाशास्त्री व्यासः | डॉ. सुशान्तहोता |
| 6 | पुराणेषु सर्गः | गौरी पि |
| 7 | साहित्यशास्त्रदिशा काशिकापठितोदाहरणानां पर्यालोचनम् | डॉ. धर्मेन्द्रदासः |
| 8 | स्त्रीशक्तिभि: धर्मप्पोषणम् | कपिल: जानी |
| 9 | महर्षि दयानन्द की शिक्षा पद्धति का व्यावहारिक पक्ष : एक दृष्टि | अनामिका |
| 10 | भारतीय संस्कृतिनिष्ठ मानवमूल्यः कल आज और कल | डॉ. गीता शुक्ला |
| 11 | A light on Ṣaṭkarma according to Haṭha Yogic texts | Atanu Bandyopadhyay |
| 12 | शब्दशास्त्रवतां वृत्तिस्वरूपविचार: | लोकेशकुमार: |
| 13 | लक्ष्मीस्वयंवरसमवकारे रसविमर्शः | रबिन्द्रनाथबारः |




[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

# मुख्यसम्पादकीयम्

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।
सघनतमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुविभव्या भारती कापि दिव्या॥

अये मान्यमान्याः संस्कृतसेवनतत्पराः ग्रन्थिग्रन्थविभेदनदक्षाः अनारतसुरभारतीप्रचार-प्रसारे बद्धपरिकराः पण्डितप्रवराः संस्कृतानुरागिणः शास्त्रजिज्ञासवश्च!

प्रपञ्चस्य सर्वप्रथमान्तर्जालीयत्रैमासिकसंस्कृतशोधपत्रिकायाः जाह्नव्याः सप्तचत्वारिंशदष्टचत्वारिंशत्-संयुक्ताङ्कमिमं विविधबुधवन्दितचरणानां श्रीमतां तत्रभवतां संस्कृतानुरागिणां पाठकानां करकमलयोः सादरं समर्पयन् अमन्दमानन्दमनुभवामि।

पत्रिका प्रारम्भसमयादेव संस्कृतप्रचारप्रसाराय स्थापितपरम्परानुसारं प्रत्यङ्कं अस्याः लोकार्पणकार्यक्रमः समजनि। इतः पूर्वं अमेरिका-अटलाण्टानगर्यादिष्वपि प्रख्यातविद्वद्भिः लोकार्पणकार्यक्रमः सम्पन्नः। एतत्परम्परायां अस्मदादीनां परमसौभाग्यवशादेव हिमाचलप्रदेशसर्वकारस्य शिक्षामंत्रिवर्यैः स्वनामधन्यैः संस्कृतप्रचारप्रसारायबद्धपरिकरैः श्रीमद्भिः गोविन्दसिंहठाकुरमहोदयैः प्राशासनिककार्यव्यस्ततयामपि सत्यां पत्रिकालोकार्पणाय स्वकीयाप्रीत्यतिशयानुमतिः प्रदत्तेति। एतदर्थं तान् मन्त्रिवरान् सादरं स्तौति कार्तज्ञ्यं च प्रकटयति जाह्नवीपरिवारः। वस्तुतः पत्रिकेयं पण्डितानां मनोविनोदायानुसन्धित्सूनामुपकाराय सुरभारतीप्रचाराय शास्त्रपरम्परायाः संरक्षणाय दुर्लभपाण्डुलिपिप्रकाशनाय अनारतं बद्धपरिकरा विद्यते।

एतर्हि सुरभारत्याः उत्कर्षकालः यतोहि भारतसर्वकारस्य यशस्विनः प्रधानमन्त्रित्रिपदममलङ्कुर्वन्तस्तत्र भवन्तः नरेन्द्रदामोदरदासमोदीमहोदयाः सुरभारतीसेवनतत्पराः सन्तः केन्द्रियसंस्कृतविश्वविद्यालयत्रयस्य कुलपतीनां कायेन मनसावाचा अनुदानेन च महत्साहाय्यं कुर्वन्ति यच्च उत्कर्षमहोत्सवावसरे लेखकैरप्यनुभूतम्। संस्कृतजगति मौलिभूताः केन्द्रियसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. श्री निवास वरखेड़ी महाभागाः अहर्निशं संस्कृतसेवाव्रतिनः सन्तीति संस्कृतविद्वद्भ्यो महते मोदाय कल्पितम्।

प्रस्तुतङ्के त्रयोदश-आलेखाः पक्षपातशून्यमनसा चयनसमित्या मत्सन्निधौ सम्प्रेषिताः सर्वेपि महत्वपूर्णाः येषु 'साहित्यशास्त्रदिशा काशिकापठितोदाहरणानां पर्यालोचनम्, शब्दशास्त्रवतां वृत्तिस्वरूपविचारः, सिद्धान्तकौमुद्याः रत्नार्णवटीकायाः समीक्षात्मकः परिचयः, आलयविज्ञान' का विवेचन- बौद्ध धर्म के सन्दर्भ में, भारतीयज्ञानपरम्परायां शिक्षाशास्त्री व्यासः, Study Of Palāśa Plant on Indian Perspective, महर्षि दयानन्द की शिक्षा पद्धति का व्यावहारिक पक्ष : एक दृष्टि' इत्यादय शोधालेखाः, पण्डितानां मनांसि नियतं कवलीकरिष्यन्ति इति मे दृढ़ीयान् विश्वासः।

विभिन्नप्रान्तेभ्यः प्रेषितपण्डितप्रवराणां शोधालेखान् प्राप्य हृष्यति मे मनः। एतेषां विद्वद्वराणामाचार्याणां लेखसाहाय्येनेयं पत्रिका सारस्वतरङ्गस्थले सन्ततं नृत्यमाना वर्तते। एतदर्थं सश्रद्धं कार्तज्ञ्यं प्रकटयति पत्रिकापरिवारः। पत्रिकायाः अस्याः साफल्ये नैकविधं साहाय्यं दत्तवद्भ्यः आयुषमद्भ्यः चेन्नैस्थलोयलामहाविद्यालयीयसंस्कृतविभागाध्यक्षेभ्यः डा. सुमन आचार्यमहोदयेभ्यः अपि च डा. मीनाक्षी जोशी, डा. बिन्दकुमार, डा. प्रीतीवर्मा, डा. रामसेवक झा महोदयेभ्यः साधुवादान् विधास्ये।

पत्रिकायाः साफल्यवैफल्ययोर्निधारणं विद्वांसः संस्कृतानुरागिणः पाठका एव विधास्यन्ति।

**श्रुतिध्वनि मनोहरा मधुरसा शुभापावनी**
**स्मृताप्यतनुतापहृत् समवगाह सौख्यप्रदा।**
**निषेव्यपदङ्कजा सुकृतिमूर्तिमन्याऽमला**
**समस्तजगतीतले प्रवहतादियं जाह्नवी॥**

विदुषाञ्चरणचञ्चरीकः,

**सदानन्दः झोपाख्यः,**

जे.एन.बी. लगमास्थादर्श संस्कृतमहाविद्यालयीयप्राचार्यः

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

# प्रकाशकीयम्

भारतीयस्वातन्त्र्यस्य पञ्चसप्ततिवर्षमहोत्सवस्य समाचरणं सोल्लासं दृश्यते। प्रत्येकस्मिन् गृहे त्रिवर्णध्वजः भारतीयसफललोकतन्त्रस्य जयमुद्घोषयन् विश्वमण्डले दरीदृश्यते। भारतवर्षस्य संस्कृतिः सर्वथा सर्वदा विश्वजनान् एकस्मिन् सूत्रे निबध्नाति एतस्मात् कारणादेव वैदेशिका अपि भारतं प्रतिस्वीयं भावकुस्माञ्जलिं समर्पयन्ति।

भारतीयसंस्कृतेः मुकुरीभूता भवति अस्मदीया संस्कृतभाषा। अद्यत्वे विश्वस्मिन् विश्वे संस्कृतसप्ताहपर्व सोल्लासमाचर्यते। संस्कृतसप्ताहाचरणस्य मूलहेतुर्भवति संस्कृतस्य भारतीयसंस्कृतेश्च प्रचारप्रसारः आविश्वं यथा स्यादिति।

इयं जाह्नवीपत्रिका अस्मिन् सन्दर्भे नितरां स्वकीयां भूमिकां निर्वहन्ती अस्ति। संस्कृते यत् ज्ञानविज्ञानं वर्तते तेषां विश्वपटले समुपस्थापनं यथा स्यात् तथा निरन्तरं कार्यं करोति। अस्मिन् क्रमे एव अद्यारभ्य पञ्चदशतालिकापर्यन्तम् आयोज्यमाने संस्कृतसप्ताहोत्सवे एकामान्ताराष्ट्रियविचारगोष्ठीं समायोजयति तत्र सप्तदिवसात्मके कार्यक्रमे 53 संस्थानां, 12 भारतीयराज्यानां 06 देशानां, 14 भारतीयभाषाणां, 07 वैदेशिकभाषाणां, 119 विदुषां सहभागिता वर्तते इति महत्प्रमोदास्पदम्।

जाह्नवी-ई-शोधपत्रिका निरन्तरं गुणवत्तायुतशोधपत्राणां प्रकाशनं कुर्वन्ती अस्मिन्नङ्केऽपि आहत्य त्रयोदशर्दशविद्यावदेव चतुर्दशानामालेखानां चयनं विधाय प्रकाशनं करोति । अत्र ये केचन् प्रत्यक्षाप्रत्यक्षरूपेण सहायकाः तेषां वाक्कायकुसुमैः कार्तज्ञं विभर्मि।

श्रैमत्कः

डा. बिपिनकुमारझाः

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

# आलयविज्ञान' का विवेचन- बौद्ध धर्म के सन्दर्भ में

डॉ .सोनल सिंह[1]

**प्रमुखशब्दा- विज्ञप्ति, अविद्या,प्रतिसन्धि,निवृत्ति, सोपधिशेष**

**शोधसार-** भगवान के द्वारा उपदेशित धर्म वर्तनाम समय में हीनयान तथा महायान के रूप में प्रचलित हैं तथा सम्प्रदाय भेद से चार हैं। वैभाषिक, सौत्रान्तिक, योगाचार व माध्यमिक। योगाचार ही विज्ञानवाद तथा माध्यमिक /शून्यवाद के नाम से विख्यात है। विज्ञानवाद सम्प्रदाय का मुख्य वैशिष्ट्य आलयविज्ञान के माध्यम से संसार के प्रवृति तथा निवृति चक्र के बन्ध से निवृत होना है। इस प्रकार आलयविज्ञान योगाचार का वैशिष्ट्य है, या कह सकते हैं कि योगाचार मत कि एक विशेष देन है। यह एक ऐसा तत्त्व है, जिसमें जगत के समस्त धर्मो के बीज निहित रहते हैं, उत्पन्न होते हैं तथा विलीन हो जाते हैं।

**अर्थ** आलय शब्द का अर्थ है 'स्थान[2]' या आश्रय। सभी धर्म इसमें कार्य रूप से आलीन होते हैं अर्थात् उपनिबद्ध होते हैं, इस कारण इस विज्ञान[3] को आलय कहते हैं,[4] इस तरह विज्ञान में जन्म जन्मान्तर के पुण्य/पापादि का संग्रह होता है, वे विपाक[5] विज्ञान होते हैं। आलयविज्ञान सभी धर्मो का आश्रय अनादिकालिक धातु है उसी के होने पर संसार की गति अथवा निर्वाण की उपलब्धि होती है।

**थेरवादी/ हीनयान आगम-** पालि त्रिपिटकों में आलय विज्ञान का उल्लेख प्राप्त है। अभिधम्मत्थसंगहो में इसे 'भवङ्ग' के नाम से व्याख्यायित किया जाता है। भवङ्गचित को मनोद्वार कहते हैं[6] वही महासांधिकों में, मूलविज्ञान के नाम से जानते हैं। इस प्रकार 'आलयविज्ञान' की सत्ता नवीन नहीं है, त्रिपिटकों में भी इसके लक्षण आसानी से मिल जाते हैं। यहाँ तक कि आलय शब्द महावग्गपालि[7],मूलपण्णासपालि,सगाथवग्ग, चतुक्कनिपातपालि तथा विनय के महावग्ग में वर्णित है, जिसका विवरण है- **''आलयरामा भिक्खवे, पूजा आलयरता, आलयसमुदिता, सा तथागतेन अनालये धम्मे देसियमाने सुस्सूसति सोतं ओदहति अञ्ञा चित्तं उपट्ठपेति।**[8] ''तथागत के लोक में उत्पाद का यह उद्देश्य है कि वे 'आलय' के प्रति स्नेह रखनेवाले जीवों का उसके त्याग का उपदेश करते हैं, जिसे सुनकर और तदनुकूल आचरण करके वे अपना लक्ष्य अर्थात निर्वाण को प्राप्त कर सके।

**महायान आगम-** महायान साहित्य में आलय विज्ञान का विस्तृत विवरण लंकावतार सूत्र में प्राप्त है। यह ग्रन्थ नौ वैपूल्य सूत्रों[9] में पूजनीय है। लंकावतार सूत्र में आगमानुयायी विज्ञानवादियों के उक्त पक्ष को समझाते हुए कहा गया है

[1] PDF, Central Sanskrit University, Lucknow.

[2] आलयः स्थानमिति पर्यायो, विज्ञप्तिमात्रतासिद्धि-प्रकरणद्वयम्, सम्पादक रामशंकरत्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, 1992 पृ 150

[3] विजानातीति विज्ञानम्, विज्ञप्तिमात्रतासिद्धि, सं सं वि. वि. 1992, पृ 151

[4] अथवाऽऽलीयन्ते उपनिबध्यन्तेऽस्मिन.सर्वधर्मबीजाश्रयत्वाद् सर्वबीजकम् विज्ञप्तिमात्रतासिद्धि-प्रकरणद्वयम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय-वाराणसी, 1992 पृ 151

[5] फल

[6] मनोद्वारं पन भवङ्गं ति पवच्चति।अभिधम्मत्थसंगहो प्रथम भाग पृ, सं सं वि. वि1991, 240

[7] आलयरामाय खो पन पजाय आलयरताय आलयसम्मुदिताय...ब्रह्मयाचनकथा,महापदानसुत्तं दीघनिकाय दुतीयो भागो, स्वामी द्वरिकादासशास्त्री, बौद्ध भारती ग्रन्थमाला, 2009 पृ 294

[8] दुतियतथागत अच्छरियसुत्तं, भयवग्गो, चतुक्कनिपातपालि, अंगुत्तरनिकाय पृ

[9] सद्धर्मपुण्डरीक,लङ्कावतार,सुवर्णप्रभा,गण्डव्यूह,तथागतगुह्यक, समाधिराज, दशभूमिश्वर एवं अष्टसाहस्रिकाप्रज्ञापारमितासूत्र।



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

कि **गर्भस्तथागतानां हि विज्ञानैः सप्तभिर्युतः।**[10] सभी तथागत गर्भो का सप्तविध विज्ञानों के द्वारा योग होता है। आलय विज्ञान के साथ क्लिष्ट मनोविज्ञान षडविधा प्रवृत्ति विज्ञान प्रवृत्त होते हैं, कुल मिलाकर ये सात विज्ञान तथागतगर्भ से युक्त होते हैं तथागत गर्भ ही आलयविज्ञान है।

महायान के अनुसान, सभी सत्त्व 'तथागतगर्भ' होते हैं। महायानियों का विश्वास है कि जगत् के अशेष संपूर्ण सत्त्वों में, बुद्ध बीज विद्यमान है अर्थात् सब में तथागत होने की संभावनायें विद्यमान हैं। 'तथता' के बीज विद्यमान हैं, इसलिए सभी प्राणी तथागर्भ हैं। महायानी यह मानते हैं कि सभी प्राणी एक न एक दिन बुद्धत्व अवश्य ही पायेंगे। जो तथागतगर्भ है, वही आलयविज्ञान है।

लंकावतारसूत्र में इस बात को समझाते हुए कहा गया है। यदि साधक चाहे तो वह महायान में प्रवेश लकर विज्ञप्तिमात्रता की स्थिति तक पहुँच सकता है। यह विज्ञप्तियां केवल बुद्धचित्तों को, बुद्धत्व प्राप्त सत्त्वों के चित्त का आलम्बन होती है अर्थात् जब तक बुद्धत्व प्राप्ति न हो जाए तब तक आलयविज्ञान की धारा चलती रहती है किन्तु जिस क्षण बुद्धत्व प्राप्ति हो जाती है आलयविज्ञान की धारा उलट जाती है और इसे ही आश्रय परावृत्ति कहते हैं। ऐसे में आलय विज्ञान समताज्ञान तथा आठ विज्ञानों का उल्लेख लंकावतारसूत्र में स्पष्ट रूप से मिलता है।[11] आलयविज्ञान में एक प्रकार का अनास्रवबीज स्थित रहता है। जिसके विकसित होते ही 'तथागततत्त्व' नामक पदार्थ की प्राप्ति होती है। तथागत का बीज वासना जिस पर आश्रित रहता है, वही तथागतगर्भ हैं इस उक्ति के अनुसार आलयविज्ञान ही तथागतगर्भ है।[12]

पुनः ''आर्य सन्धिनिर्मोचन सूत्र' के 'विशालमतिपरिपृच्छा' नामक पञ्चम परिच्छेद में आलयविज्ञान का स्वरूप इस प्रकार मिलता है।

**आदानविज्ञानगम्भीरसूक्ष्मो ओघो यथा वर्तति सर्वबीजो।**
**बालान एषो मयि न प्रकाशितो मा हैव आत्मा परिकल्पयेयुः।।**[13]

अर्थात्- आलयविज्ञान ही आदान विज्ञान है, यह पाँच उपादान स्कन्धों को ग्रहण करता है, यह गम्भीर है, सूक्ष्म है, क्योंकि यह श्रावक जन एवं प्रत्येकबुद्ध जन का विषय नहीं है, समस्त धर्मो के बीच संस्कार के वासनाओं का यही आश्रय है, इस कारण इसे सर्वबीजक भी कहते हैं। जिस प्रकार सागर में आये हुए तृण एवं काष्ठ को तरंगे निरन्तर बहा ले जाती हैं, उसी प्रकार आलयविज्ञान समस्त धर्मो के बीजों को स्वयं में रखकर निरन्तर प्रवाहित करता रहता है।

भगवान कहते हैं कि मैंने इसे पृथग्जनों के सम्मुख इसलिए नहीं प्रकाशित किया, क्योंकि वे आत्मा समझकर मोहित हो आत्मवादी बन जायेगें।

अभिधर्मसूत्र में भी आलयविज्ञान को इस प्रकार स्पष्ट किया गया है कि-

**अनादिकालिको धातुः सर्वधर्मसमाश्रयः।**
**तस्मिन् सति गतिः सर्वाः निर्वाणाधिगमोऽपि वा।।**[14]

[10] लंकावतारसूत्र, स्वामी द्वारिका दास शास्त्री, बौद्ध भारती ग्नन्थमाला 2006- पृ 106

[11] विज्ञप्तिमात्रतासिद्धि पं रामशकंर त्रिपाठी संम्पूणानन्द संस्कृत वि0 वि0 1993 सारांश, पृ- 21

[12] विज्ञप्तिमात्रतासिद्धि पं रामशकंर त्रिपाठी संम्पूणानन्द संस्कृत वि0 वि0 1993 सारांश, पृ- 22

[13] आदानविज्ञानगम्भीरसूक्ष्मो ओघो यथा --विज्ञप्तिमात्रतासिद्धि, सारांश,पृ- 19, बौद्धदर्शन प्रस्थान पृ- 157 , मूल आर्यसन्धिनिर्मोचनसूत्र

[14] अनादिकालिको धातुः सर्वधर्मसमाश्रयः।, विज्ञप्तिमात्रतासिद्धि सारांश पृ- 20

यह जो आलय विज्ञान है अनादि है अर्थात् न जाने कब से चित के साथ लगा हुआ है। यद्यपि यह स्वयं चित ही है, अर्थात् सभी विज्ञान चित्त ही हैं। यह सभी धर्मों का संश्रय है, आश्रय है अर्थात् इसमें अनादिकाल से किये गये कर्मों की वासनाऐं सूक्ष्म रूप से संस्कार के रूप में विद्यमान रहती हैं कहते हैं कि उसके रहने पर ही सभी प्रकार की लौकिक और लोकोत्तर गतियां सम्भव हो पाती हैं, यहाँ तक की निर्वाण की प्राप्ति पर्यन्त ये बना रहता है। 'सोपधिशेष निर्वाण के अनन्तर क्लिष्ट मनोविज्ञान और षडविधा प्रवृत्तिविज्ञान सर्वज्ञता ज्ञान और मार्गज्ञता ज्ञान में परिणत हो जाते हैं। इसी अवस्था को बुद्धत्व प्राप्ति कहते हैं इसी को बोधि कहते हैं। इसी को प्राप्त करने के लिए सत्त्व जन्म जन्मान्तर तक प्रार्थना करते हैं। इस प्रकार महायान सूत्रों में आलय विज्ञान की विशद व्याख्या मिलती है।

**भेद-** योगाचार या विज्ञानवादी सम्प्रदाय के दो अवान्तर भेद हुये- युक्त्यनुयायी विज्ञानवादी और आगमानुयायी विज्ञानवादी। आगमानुयायी विज्ञानवादी के आचार्य आर्य असङ्ग, वसुबन्धु तथा युक्त्यनुयायी सम्प्रदाय के आचार्य दिङ्नाग धर्मकीर्ति हैं। विज्ञानवादियों का एक भेद सत्कारविज्ञानवादी तथा मिथ्याकारविज्ञानवादी के रूप में भी मिलता हैं। सभी प्रकार के विज्ञानवादी यह मानते हैं कि विज्ञान, विज्ञप्ति, मनस, अथवा चित्त समानार्थी है।[15] तथा यह भी कि 'विज्ञप्ति' ही परमार्थतः सत् है। इससे भिन्न जो कुछ है वह व्यवहारिक सत्य है दोनों सम्प्रदायों में मुख्य अन्तर यह है कि युक्त्यनुयायी कुल छः विज्ञान की सत्ता को मानते हैं। यथा-चक्षुर्विज्ञान, स्रोतविज्ञान, घ्राणविज्ञान, जिह्वाविज्ञान, कायविज्ञान और मनोविज्ञान। जबकि इससे भिन्न सम्प्रदाय वाले अर्थात् आगमानुयायी विज्ञानवादी अष्टविध विज्ञानवादी हैं। सातवां विज्ञान 'आलय विज्ञान' तथा आठ्वां क्लिष्टमनोविज्ञान है। 'क्लिष्टमनोविज्ञान से तात्पर्य है- क्लेश से युक्त क्लिष्ट मनोविज्ञान राग, द्वेष, मोह ही त्रिविध क्लेश है इनसे युक्त रहने के कारण इस 'मनोविज्ञान' को क्लिष्ट कहते हैं। आलयविज्ञान के और भी नाम हैं विपाकविज्ञान, मूलविज्ञान, आदानविज्ञान, विमलविज्ञान आदि।

**विषय-** विज्ञानवाद में विज्ञप्ति ही एकमात्रसत् है। संसार की प्रत्येक वस्तुऐं अलातचक्र की भांति असत् है। वस्तुतः सभी हमारे चित्त के प्रतिबिम्ब स्वरूप हैं, जिन्हें हम अविद्या से ग्रस्त होने के कारण बाह्य वस्तु समझते हैं।[16] आलयविज्ञान के बिना भी संसार की प्रवृति निवृत्ति सम्भव नहीं हैं। प्रवृत्ति शब्द से तात्पर्य शरीर का पुनः प्रतिसन्धि ग्रहण करना तथा निवृत्ति से सोपधिशेष और निरूपधिशेष निर्वाणधातु को प्राप्त करना।

आगमानुयायी योगाचार सन्तों के प्रतिपादक, आर्य मैत्रेयनाथ तथा आर्य असङ्ग व वसुबन्धु आदि थे। आलयविज्ञान की उत्पत्ति का सुविस्तृत ज्ञान सर्वप्रथम असंग के ग्रन्थ योगाचारभूमि में प्राप्त होता है। आगे जाकर आचार्य वसुबन्धु ने अपने ग्रन्थों में इन्हें और सरल एवं स्पष्ट ढंग से प्रस्तुत किया। चार स्वरूपों के द्वारा आलयविज्ञान को समझना आसान हो जाता है। वे स्वरूप हैं- 1- आलम्बन 2- आकार 3- स्वरूप 4- उससे उत्पन्न चैत्तसिक। आर्य असंग के ग्रन्थों में आलय विज्ञान की चर्चा गम्भीर एवं गूढ़ है। वसुबन्धु ने 'विज्ञप्तिमात्रतासिद्धि' में आलय विज्ञान की चर्चा सरल शब्दों में की है।[17] यथा-

[15] चित्तं मनोऽथ विज्ञानमेकार्थं चिनोतीति चित्तम्। मनुत इति मनः। विजानातीति विज्ञानम्। चित्तं शुभाशुभैर्धातुभिरिति चित्तम्। अभि. को.भा. 2/ 34, बौद्ध भारती ग्नन्थमाला

[16] विज्ञप्तिमात्रमेवैतदसदर्थावभासनात्।यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम्।।1।। विज्ञप्तिमात्रतासिद्धि-प्रकरणद्वयम् सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, 1992 पृ 17

[17] आत्मधर्मोपचारो हि विविधो यः प्रवर्तते। विज्ञप्तिमात्रतासिद्धि त्रिंशिका, कारिका -1, 2





**आत्मधर्मोपचारो हि विविधो यः प्रवर्तते।**

**विज्ञानपरिणमोऽसौ परिणामः स च त्रिधा।।1।।**

**विपाको मननाख्यश्च विज्ञप्तिर्विषयस्य च।**

**तत्रलयाख्यं विज्ञानं विपाकः सर्वबीजकम्।।2।।**

अर्थात् विज्ञान का परिणाम तीन प्रकार का है, विपाकविज्ञान, मनन, मनोविज्ञान और विषयविज्ञप्ति। इनमें विपाक विज्ञान ही आलयविज्ञान है, शुभ अशुभ कर्मों की वासना के परिपाक से, जिस फल की अभिनिवृत्ति होती है, वही विपाक विज्ञान कहलाता है।

'मनन या' क्लिष्ट मनोविज्ञान द्वितीय परिणाम है। इसका उद्भव आलयविज्ञान में स्थित वासना के परिपक्व होकर बहिर्गत होने के साथ ही होता है तथा उसके शान्त होते ही समाप्त हो जाता है।

छः प्रकार के चक्षुरादिविज्ञान को विषयविज्ञप्ति कहते हैं। क्योंकि इनके विषयों का प्रत्यवभास होता है। विषयो की प्रतीति होती है। विज्ञप्तियों के ये तीन प्रकार ही 'परिणमन' हैं अर्थत्वप्रज्ञप्तियां ही इन तीनों में बदलती है जिससे इन्द्रियां व उनके विषय उत्पन्न होते हैं।[18]

आलयविज्ञान को 'सर्वबीजक विज्ञान' भी कहते हैं, सर्वबीजक विज्ञान इसलिए, क्योंकि यह समस्त सांक्लेशिक और वैयदानिक धर्मों की वासनाओं का आश्रय है। इसके कारण इसे आधारविज्ञान भी कहते हैं। समस्त धर्म इसमें कार्यत्वेन उपनिबद्ध होते हैं। इसलिए यह आलय कहलाता है। जानता है, इस कारण इसे विज्ञान कहते हैं। 'विजानातीति विज्ञानम्' इसे विपाकविज्ञान भी कहते हैं क्योंकि इसमें समस्त धातु[19], गति[20], योनि[21] एवं जातियों[22] में यह कुशल, अकुशल कर्मों के विपाक के रूप में उत्पन्न होता है।[23] **विजानातीति विज्ञानम्।--- सर्वधर्मबीजाश्रयत्वात् सर्वबीजकम्।**[24] पुनः आलयविज्ञान में पांच सर्वत्रग चैतसिक रहते हैं। वे पांच हैं- स्पर्श, मनस्कार, वेदना, संज्ञा, चेतना। **असंविदितकोपादि-**

**स्थानविज्ञप्तिकमं च तत्।**[25]

**आलयविज्ञान के चैतसिक**[26]

**सदा-स्पर्श-मनस्कार-वित-संज्ञा-चेतनान्वितम्।** सभी प्रकार के विज्ञानों या चित्तों के भीतर पाये जाने वाले धर्मों को चैतसिक कहते हैं। **'चित्ते भवाः चैत्तसिकाः'**[27] चित्त में जिस क्षण जो धर्म, रहता है वैसी ही प्रतीति होती है। उसे ही चैतसिक कहते हैं। आलयविज्ञान में पांच चैतसिक हमेशा रहते हैं जो हर जगह पाये जाते हैं।[28]

[18] देव, आचार्य नरेन्द्र ,बौद्ध धर्म दर्शन मोतीलाल बनारसीदास दिल्ली पुर्नमुद्रण 2006,पृ- 437

[19] तीन धातुयें हैं- कामधातु, रूपधातु, अरूपधातु।

[20] **गति-** देव, असुर, मनुष्य, तिर्यक, प्रेत, नारक, आसुर को छोड़कर पांच गतियां होती हैं

[21] **योनियां-** जरायुज अण्डज, संस्वेदज, औपपादुक ये चार योनियां हैं।

[22] **जाति-** क्षत्रिय, ब्राह्मण, वैश्य, शूद्र

[23] विज्ञप्तिमात्रतासिद्धि त्रिंशिका पृ 153

[24] विज्ञप्तिमात्रतासिद्धि त्रिंशिका, सारांश पृ-77, अभिधर्मकोशभाष्यस्फुटार्थासहितं,बौद्ध भारती ग्रन्थमाला,1987, 3-1

[25] विज्ञप्तिमात्रतासिद्धि त्रिंशिका, कारिका 3

[26] चेतसि भवं तदायत्तवुत्तिताया ति चेतसिकं अभिधम्मत्थसंगहो प्रथम भाग, सं सं वि व. 1991 पृ 15

[27] ''चित्ते भवाः चैत्तसिकाः'' अभिधर्मकोशभाष्यस्फुटार्थासहतिम्, उपेक्षा वेदना तत्रनिवृताव्याकृत च तत्। विज्ञप्तिमात्रतासिद्धि त्रिंशिकाभाष्य, कारिका 4 भाष्य, पृ 173

[28] उपेक्षा वेदना तत्रनिवृताव्याकृत च तत्। विज्ञप्तिमात्रतासिद्धि त्रिशिकाभाष्य, कारिका 4 भाष्य,पृ 173

आलयविज्ञान की एक विशेषता यह भी है कि उसमें जो वासनायें विद्यमान रहती हैं उनके प्रति वह उदासीन रहता है अर्थात् उपेक्षा वेदना पायी जाती है। यथा-

**उपेक्षा वेदना तत्रानिवृताव्याकृत च तत्।**

**तथा स्पर्शादयः तच्च वर्तते स्रोतसौधवत्॥4॥**

अर्थात् उपेक्षारूप वेदना अदुःखासुखा ही आलयविज्ञान का धर्म है। क्योंकि सुखवेदना तथा दुःखवेदना के लिए परिच्छिन्न आलम्बन की अपेक्षा रहती है। जो प्रवृत्ति विज्ञान में ही संभव है। वह 'प्रवृत' कहा जाता है। क्योंकि मनोभूमि पर उदित क्लेशों से आवृत नहीं होता है। वह 'अव्याकृत' है। क्योंकि कुशल तथा अकुशल विपाकों के रूप में विभक्त नहीं रहता। इसी प्रकार स्पर्शादि भी अपरिच्छिन्न रूप से आलय विज्ञान में रहता है जो वासनारूप कहे जाते हैं।[29] यह क्षणिक विज्ञानों का सन्तान इस प्रकार प्रवृत्त रहता है जैसे स्रोत से जलप्रवाह।

पुनः स्थिरमति ने अपने भाष्य में लिखा है कि 'अर्हत्व या बुद्धत्व प्राप्त करने पर आलयविज्ञान की निवृत्ति होने से नैरात्म्यसिद्धि मिलती है। परन्तु संसारदशा में उसके अधीन मनस्वरूप मनोविज्ञान प्रवृत्त होता है।

**तस्य व्यावृत्तिरर्हत्वे, तदाश्रिय प्रवर्तते।**

**तदालम्बनं मनो नाम विज्ञानं मननात्मकम् ॥5**

पुनः क्लिष्ट मनोविज्ञान मनन करने वाला विज्ञान है, आलयविज्ञान ही क्लिष्ट मनोविज्ञान का आश्रय तथा आलम्बन है। क्लिष्ट मनोनिज्ञान को मनस विज्ञान भी कहते हैं।[30]

**साम्य एवं वैषम्य**-'भवङ्ग' नामक चित्त तथा आलय विज्ञान में साम्यता की बात करे तो स्थविरवादी जन भवङ्ग नामक चित्त स्वीकार करते हैं और उसी के आधार पर कर्म कर्मफल पुनर्जन्म की व्यवस्था भी करते हैं, वह आलयविज्ञान की सत्ता नहीं मानते हैं। इनके मतानुसार भवङ्ग ही व्यक्तित्व है, जो कुछ अवस्थाओं को छोड़कर समुद्र की भांति भीतर ही भीतर निरन्तर प्रवाहित होता रहता है। जैसे कि आलयविज्ञान में जब तक बुद्धत्व न मिले तब तक उसकी गति अविच्छिन्न रूप से चलती रहती है, वैसे भवङ्ग नामक चित्त भी अर्हत् के निरूपधिशेष निर्वाणधातु में लीन होने तक प्रवृत्त रहता है। समुद्र से तरंगो की भांति ।[31]

आलयविज्ञान में जैसे सात प्रवृत्तिविज्ञानों की प्रवृत्ति होती है और उसी में विलीन हो जाती है समुद्र के तरङ्गों की भांति, उसी प्रकार भवङ्ग चित्त से छः प्रवृत्तिविज्ञानों की प्रवृत्ति होती है और उसी में विलीन हो जाती है। आलयविज्ञान की भांति भवङ्ग चित्त भी जन्म प्रतिसन्धि मरण कृत्य करता है, इसमें भी कुशल अकुशल कर्मों का विपाक होता है। आलयविज्ञान व भवङ्ग दोनों ही संस्कृत धर्म व क्षणिक हैं। आलम्बन की दृष्टि से इन्द्रिय अर्थ व वासनायें आलयविज्ञान का आलम्बन है, पाँच इन्द्रिय विज्ञानों के जो भी आलम्बन हैं ये सब आलय विज्ञान के आलम्बन होते हैं। भवङ्ग मनोद्वार कहलाता है अतः चक्षुरादि द्वारो तथा मनोद्वार में आभासित होने वाले आलम्बन भवङ्ग के भी आलम्बन होते हैं।

इस प्रकार साम्यता होने के बाद भी इनमें कुछ मतभेद भी दिखाई पड़ते हैं। विज्ञानवादी अनेक विज्ञानों की स्थिति स्वीकारता है, फलस्वरूप जैसे प्रवृत्ति विज्ञान उत्पन्न होते हैं उस समय आलय विज्ञान स्थित रहता है,इनका मानना है कि

[29] अवस्थी, बच्चुलाल, ज्ञान भारतीय दर्शन बृहत्कोश, शारदा पब्लिशिंग हाउस 2004 पृ- 806
[30] तदाश्रित्य प्रवर्तते तदालम्बं मनोनाम विज्ञानं मननात्मकम्॥ विज्ञप्तिमात्रतासिद्धि त्रिंशिका कारिका 5
[31] तस्य व्यावृत्तिर्हत्वे, तदाश्रिय प्रवर्तते। विज्ञप्तिमात्रतासिद्धित्रिंशिकाभाष्य,कारिका 5 पृ 180





एक क्षण में कम से कम तीन विज्ञान एक साथ रहते हैं यथा आलय विज्ञान,क्लिष्ट मनोविज्ञान तथा प्रवृत्ति विज्ञान में से कोई एक। इस तरह आलय विज्ञान एक स्थिर विज्ञान के समान होता है, जिसमें सदा वासनायें रहती हैं, दूसरा कोई विज्ञान इनका आधार नहीं बनती हैं। स्थविरवादी जन एक काल में एक से अधिक विज्ञान नहीं मानते हैं, उनका मानना है कि जब कोई वीथिचित्त उत्पन्न होता है तो उस कालखण्ड में भवङ्ग निरूद्ध हो जाता है, इस कारण भवङ्ग वासनाओं का आधार नहीं होता है,अपितु लोकोत्तर चित्तो को छोड़कर सम्पूर्ण चित्तसन्तति वासनाओं को आधार है।

**निष्कर्ष**- इस प्रकार विज्ञानवाद के अनुसार आलयविज्ञान में कुशल अकुशल अव्याकृत आदि वासनायें निहित रहती है। वह समस्त बीज धर्मों का आधार होता है उसी प्रकार भवङ्ग में षडविज्ञान उत्पन्न होकर उन्हीं में पतित हो जाती है। फलस्वरूप वह भी वासनाओं का आधार होती है। भवङ्ग तथा आलयविज्ञान संस्कृत और क्षणिक होते हैं। जहाँ इन दोनों के बीच समानता नजर आती है। वहीं कुछ अन्तर भी है। जैसे- विज्ञानवाद में यह मान्यता है कि कम से कम तीन विज्ञान अवश्य उपस्थित होते हैं- आलयविज्ञान, क्लिष्ट मनोविज्ञान, कोई एक प्रवृत्तिविज्ञान। अर्थात् यह युगपत् उपस्थिति में रहती है। वहीं स्थविरवाद में ऐसी कोई धारणा नहीं है कि एक काल में एक से अधिक विज्ञान उपस्थित हों यह मानते हैं कि जब कोई प्रवृत्तिविज्ञान उत्पन्न होता है तब भवङ्ग चित्त निरुद्ध हो जाता है। इसे वह भवाङ्गोपच्छेद नामक संज्ञा देते हैं। फलस्वरूप वह मानते हैं कि केवल भवङ्ग ही वासनाओं का आधार नहीं होता अपितु लोकोत्तर चित्तो को छोड़कर समस्त चित्त यथायोग्य वासनाओं के आधार होते हैं।[32] इस प्रकार आलयविज्ञान की सत्ता को आगमानुयायी विज्ञानवादी ही स्वीकार करते हैं।

## सन्दर्भग्रन्थसूची

1.अभिधम्मत्थसंगहो प्रथम भाग, अनिरुद्धाचार्य, सं सं वि. वि, 1991
2.अभिधर्मकोशभाष्यस्फुटार्थासहितं,बौद्ध भारती ग्रन्थमाला,1987
3.अंगुत्तरनिकाय बौद्ध भारती वाराणसी 2009
4.महापदानसुत्तं दीघनिकाय दुतीयो भागो, स्वामी द्वारिकादासशास्त्री, बौद्ध भारती ग्नन्थमाला, 2009
5.बौद्धदर्शन प्रस्थान, आचार्य रामशंकर त्रिपाठी, केन्द्रीय उच्च तिब्बती शिक्षा संस्थान 1997
6.बौद्धधर्म दर्शन,आचार्य नरेन्द्र देव, मोतीलाल बनारसीदास दिल्ली पुर्नमुद्रण 2006
7.लंकावतारसूत्र, स्वामी द्वारिका दास शास्त्री, बौद्ध भारती ग्नन्थमाला 2006-
8.विज्ञप्तिमात्रतासिद्धि-प्रकरणद्वयम्, सम्पादक रामशंकरत्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, 1992
9.ज्ञान भारतीय दर्शन बृहत्कोश, बच्चुलाल अवस्थी, शारदा पब्लिशिंग हाउस 2004

[32] त्रिपाठी, आचार्य रामशंकर, बौद्धदर्शन प्रस्थान, भूमिका, पृ- xxxi-xxxii

# सिद्धान्तकौमुद्याः रत्नार्णवटीकायाः समीक्षात्मकः परिचयः

राजेशचन्द्रः पोखरियाः[33]

**प्रमुखशब्दाः-** भाषा, वैयाकरणसिद्धान्तकौमुदी, वैज्ञानिकत्वम्, पाणिनीयव्याकरणम्।

**शोधसारः-**पाणिनीयव्याकरणस्य प्रक्रियानुसारिव्याख्यानपरम्परायां वैयाकरणसिद्धान्तकौमुदी मूर्ध्नि वर्तते, अस्याः टीकापरम्परातीवविस्तृतास्ति, तत्राप्रकाशितटीकास्वन्यतमायाः रत्नार्णवाख्यटीकायाष्टीकाकर्तुश्च सर्वैशिष्ट्यं समीक्षात्मकः परिचयः कौमुदीटीकापरम्परोल्लेखपूर्वकं अस्मिन् शोधपत्रे प्रदत्तो वर्तते – सं.

मानवभावाभिव्यक्तये भाषासदृशं साधनं न किमपि वर्तते । भाषायाः यथावत् संरक्षणस्य दायित्वं तत्तद्भाषायाः व्याकरणस्य भवति। यतोहि शब्दसाधुत्वासाधुत्वप्रतिपादकं शास्त्रं व्याकरणमेव। यथा प्राचीना संस्कृतभाषा तथैव प्राचीनं संस्कृतव्याकरणम्। प्राचीनकालादेव व्याकरणपरम्परा प्रचलति। संप्रति च सर्वग्राह्यं, सुप्रचलितं प्रामाणिकञ्च व्याकरणं भवति पाणिनीयं व्याकरणम्। तत्र कारणमस्य लाघवत्वं, वैज्ञानिकत्वं त्रिमुनिपोषकत्वञ्च। पाणिनीयव्याकरणमाश्रित्य द्विधा व्याख्यानपरम्परा प्रचलिता वर्तते। तत्रैका सूत्रानुसारिणी तथाऽपरा च प्रक्रियानुसारिणी। सूत्रानुसारिव्याख्यासु काशिकादयः, तथा प्रक्रियानुसारिव्याख्यासु च प्रक्रियाकौमुद्यादयः प्रचलिताः सन्ति। प्रक्रियाग्रन्थेषु सम्प्रति प्रचलितेषु प्रामाणिकेषु च ग्रन्थेषु श्रीमता भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी मूर्ध्नि विराजते। अस्याः कालः सं. - १५१० - १५७५ मध्ये स्वीक्रियते[34] । यस्य कस्यापि ग्रन्थस्य लेखकस्य सम्यग्भावाभिगमनाय तस्योपरि नानाटीकाः उपटीकाश्च विरच्यन्ते। सुष्ठु खलु उच्यते - "**टीका गुरूणां गुरुः**"। वस्तुतः ग्रन्थस्य यावत्यः अपि टीकाः भवेयुः तास्तु ग्रन्थस्य गौरवाय एव। पाठकाः अपि प्रायः चतुर्धा भवन्ति, केचन सामान्याः, केचन मध्यमाः केचनोत्तमाः तथा केचन चोत्तमोत्तमाः इति। अतः सर्वाः अपि टीकाः अध्येतॄणां, विदुषां तथाऽनुसन्धातॄणां मोदाय एव भवन्ति।

**सिद्धान्तकौमुद्याष्टीका-परम्परा** - सिद्धान्तकौमुद्याः अपि विविधाष्टीकाः सन्ति। अद्यावधि प्रायः २५ तः अधिकाः टीकाः अस्याः उपरि लिखितास्सन्ति तथा सम्प्रत्यपि लिख्यमानाः च सन्ति। यथा- प्रौढमनोरमा- भट्टोजिदीक्षितः, तत्वबोधिनी- ज्ञानेन्द्रसरस्वती, सुखबोधिनी-श्रीनीलकण्ठवाजपेयी, तत्वदीपिका-रामानन्दः, बृहच्छब्देन्दुशेरः, लघुशब्देन्दुशेरः- नागेशः, रत्नाकरः-रामकृष्णः, पूर्णिमा-रङ्गनाथयज्वा, बालमनोरमा- वासुदेववाजपेयी, रत्नार्णवः- कृष्णमित्रः, सुमनोरमा- तिरुमलद्वादशाहयाजी, प्रकाशः-तोप्पलदीक्षीतः, विलासः-लक्ष्मीनृसिंहः, रत्नाकरः-शिवरामचन्द्रसरस्वती, फक्किकाप्रकाशः-इन्द्रदत्तोपाध्यायः, बालबोधः- सारस्वतव्यूढमिश्रः, मानसरञ्जनी-बल्लभः, सुबोधिनी-जयकृष्णः, भावबोधिनी- करपुतुगलधर्मः(Karaputugaladharmas), ललिता- अनन्तनारायणः, पङ्क्तिचन्द्रिका-गङ्गाप्रसादः, तर्कचन्द्रिका-कृष्णभट्टमुनिः, सुधाकरः-कृष्णशास्त्री, कौमुदीमूलार्थविद्योतिनी- पं.दीनबन्धु-झाः, लक्ष्मी-

[33] शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

[34] संस्कृतव्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसकः, वैदिकसाधन - आश्रमः देहरादूनम्, प्रथमसं.—२००७, पृ.-३८६





पं.श्रीसभापतिशर्मोपाध्यायः,रत्नप्रभा (हिन्दीटीका)- बालकृष्णपञ्चोली, श्रीधरमुखोल्लासिनी(हिन्दीटीका)- गोविन्दप्रसादशर्मा(गोविन्दाचार्यः), इत्यादयः[35] ।

पूर्वोक्तासु टीकासु काश्चन प्रकाशिताः काश्चन च अप्रकाशिताः । प्रकाशितासु काश्चन प्रचलिताः काश्चन अप्रचलिताश्च वर्तन्ते। अप्रकाशितासु श्रीकृष्णमित्रविरचिता रत्नार्णवटीका अप्येका प्राचीना अतीवविस्तृता च वर्तते।

**सिद्धान्तकौमुद्याष्टीका-परम्परायां रत्नार्णवटीका-** अस्याष्टीकायाः उपलब्धमातृकाणामाधारेण ज्ञायते यदियं टीकाऽतीव विस्तृतेति। अतः विषयेऽस्मिन् मे समुत्सुकता अजायत। अस्याः टीकायाः अभिधानं वर्तते रत्नार्णवः इति। किन्तु किमत्र व्याकरणसिद्धान्तरूपाणि नूतनतथ्यात्मकानि रत्नानि सन्ति न वेति जिज्ञासामधिकृत्य विषयेऽस्मिन्ननुसन्धानाय मे प्रवृत्तिरजायत। परन्तु किमत्र नावीन्यं, किञ्च वैशिष्ट्यमस्याः टीकायाः तथा अन्याभिः टीकाभिः अस्याः किमपि साम्यवैषम्यादिकं वर्तते न वेत्यादिकं सर्वमनुसन्धानात् परमेव ज्ञास्यते।

**रत्नार्णवटीका-परिचयः** - वैयाकरणसिद्धान्कौमुद्याः टीकास्वन्यतमा श्रीकृष्णमित्रविरचिता टीका वर्तते रत्नार्णवटीका इति। मातृका-सूचीपत्राणां नूतनसूचीपत्रेण (NCC-२०१५) सह चौखम्बादिसंस्कृतग्रन्थ- प्रकाशनसूचीपत्राणामवलोकनेन ज्ञायते यत् टीकेयमप्रकाशितेति।

**अद्यावधि हस्तगतानां रत्नार्णवटीका-मातृकाणां परिचयः** [36] - NCC इत्यस्याधारेणास्य बहुषु संग्रहालयेषु अस्य ग्रन्थस्य मातृकाः विद्यन्ते। तासु राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरस्य मातृकासंग्रहालये तिस्रः मातृकाः विद्यन्ते । मया अद्यावधि गङ्गानाथ-झा-परिसरस्य तिस्रः एव मातृकाः सङ्गृहीताः । एतासां तिसृणामपि मातृकाणां विवरणमित्थं वर्तते -

**प्रथमा मातृका** - आदितःअजन्तपुँल्लिङ्गपर्यन्तं विद्यते। अस्याः विवरणमित्थं वर्तते -

- अधिगमसंख्या - एतस्याः मातृकायाः अधिगमसंख्या – ४९३४७ वर्तते।
- भाषा - मातृकेयं संस्कृतभाषायां निबद्धा वर्तते।
- लिपिः - अस्याः मातृकायाः लिपिः देवनागरी वर्तते ।
- पुटसंख्या - १-९८ (पञ्चसन्ध्यन्तपुटसंख्या - १-६५ / पृष्ठसंख्या = १३०)
- पङ्क्तयः- अस्यां मातृकायां प्रतिपृष्ठं नव (९) / दश (१०) पङ्क्तयः सन्ति।

[35] संस्कृतव्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसकः वैदिकसाधन आश्रम देहरादून, प्रथमसं.—२००७, पृ.-३८६, ३८७, ३८८, ३८९, संस्कृतवाङ्मय का बृहद् इतिहास( पञ्चदश खण्ड-व्याकरण) पद्मभूषण आचार्य बलदेव उपाध्याय, उत्तरप्रदेश संस्कृतसंस्थान लखनऊ, प्रथमसं.-२००१, पृ.- २३०,२३१
तथा मातृकासूचीपत्राणां नूतनसूचीपत्रम् NEW CATALOGUS CATALOGOROM VOI.XXXIX UNIVERSITY OF MADRAS( NCC-2015) पृ. --- 89--10

[36] गङ्गानाथझापरिसरस्य नूतनमातृकासूचीपत्रम् , षष्ठः खण्डः, DESCRIPTIVE CATALOGUE OF MANUSCRIPTS VYAKARANA SHIKSHA NIRUKTA KOSH (Vol.-VI) Edited by Prof. Sarvanarayan Jha, Dr. Beena Mishra and Dr. Ramkishor Jha First Ed. 2012 क्रमसं.-३०३६, ३१५०

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 Since 2010

- स्थितिः - सम्यक् (पठनयोग्या)
- पूर्णता/अपूर्णता - इयं मातृका अपूर्णा वर्तते

**द्वितीया मातृका** – केवलं तद्धितप्रकरणात्मिका (पत्रसं.-१-८४), अस्याः लिपिश्च – देवनागरी । इयमपि मातृका अपूर्णा वर्तते।

**तृतीया मातृका** - केवलं कारकप्रकरणात्मिका (पत्रसं.-१-२२), अस्याः लिपिश्च – मैथिली । इयमपि मातृका अपूर्णा वर्तते।

अस्याष्टीकायाः चतस्रः मातृकाः "सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये" उपलभ्यन्ते। एवमेव जोधपुरे "राजस्थान ओरियन्टल रिसर्च इन्स्टिट्यूट" इत्यस्य संग्रहालयेऽपि स्त्रीप्रत्ययप्रकरणपर्यन्तमियं टीकोप्लब्धा वर्तते।

**टीकाकर्तुः परिचयः**[37] -

**नाम** - अस्याः टीकायाः कर्ता श्रीकृष्णमित्रः वर्तते। अस्यापरं नाम कृष्णाचार्यः अप्यस्ति।

**वंशः**- अस्य पिता श्रीरामसेवकः तथा पितामहः श्रीदेवीदत्तः (देवदत्तः) वर्तते। जोधपुरस्थे "राजस्थान ओरियन्टल रिसर्च इन्स्टिट्यूट" संग्रहालये विद्यमानायां मातृकायामित्थं वर्णनं प्राप्यते - **"इति श्रीदेवदत्तात्मजरामसेवकतनूद्भवाचार्यकृष्णमित्रकृते रत्नार्णवे संज्ञाप्रकरणं समाप्तिमगमत्"** । अस्य पित्रा श्रीरामसेवकेन भाष्यप्रदीपव्याख्या विरचिता वर्तते।

**कालः** – प्राप्तासु तिसृषु मातृकासु टीकाकर्तुः कालः परिचयश्च नास्ति । कदाचिद् अन्यासु मातृकासु परिचयादिकं विवरणञ्च भवेत् । एवमेवैतेषामन्यप्रकाशितग्रन्थानामपि साहाय्येन कालादिविषये किञ्चिज्ज्ञातुं शक्यते । यत् कदाचिदनुसन्धानावसरे सम्भविष्यति। मया प्राप्तायाः तद्धितप्रकरणस्य मातृकायाः अन्ते पुष्पिकायामित्थं वर्णनं प्राप्यते- **"इति कौमुदीव्याख्याने रत्नार्णवे पूर्वार्धं समाप्तम्। शुभमस्तु। संवत् – १८८१ ज्येष्ठशुक्लतृतीया चन्द्रवासरम् श्रीरामकृष्णाय नमः श्री जानकीवल्लभाय नमः श्रीगुरुचरणकमलेभ्यो नमः"** [38] । एवमेव प्रो.आजादमिश्रवर्येण सम्पादितायाः रत्नाकरटीकायाः प्रथमभागस्य भूमिकायामस्य विषये उल्लेखः वर्तते यत् सिद्धान्तकैमुद्याः तत्वबोधिनीतः परं रत्नार्णवटीका तथा ततः परं च रत्नाकर-टीका विरचिता [39]इति। अतः अनुमानेनास्याः टीकायाः कालः सं. - १७००—१८०० मध्ये स्यादिति वक्तुं शक्यते।

[37] मातृकासूचीपत्राणां नूतनसूचीपत्रम् NEW CATALOGUS CATALOGOROM VOI.XXXIX UNIVERSITY OF MADRAS (NCC-2015) पृ. ९५
संस्कृतव्याकरण शास्त्र का इतिहास, युधिष्ठिर मीमांसक-रामलालकपूरट्रस्ट, बहालगढ, सोनीपत हरियाणा, चतुर्थसंस्करणम्-१९८४ पृ. सं.—६०२, ५३४,
संस्कृतव्याकरणशास्त्रेतिहासविमर्शः, श्री अशोकचन्द्र गौडशास्त्री, भारतीयविद्यासंस्थानम्, वाराणसी, प्रथमसं.-१९९७, पृ. ३६७,
संस्कृतवाङ्मय का बृहद् इतिहास ( पञ्चदश खण्ड-व्याकरण) पद्मभूषण आचार्य बलदेव उपाध्याय, उत्तरप्रदेश संस्कृतसंस्थान लखनऊ, प्रथमसं.-२००१, पृ.-२३०

[38] (४७४३५) संख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः। पृ. - ८४

[39] सिद्धान्तरत्नाकरेणभूषितायाः वैयाकरणसिद्धान्तकौमुद्याःप्रथमभागः, प्रो. आजादमिश्रः (मधुकरः) केन्द्रियसंस्कृतविद्यापीठम् , लखनऊ, प्रथमसं.-१९९५ । भूमिकायाम्।



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 Since 2010

**प्रस्तुत-ग्रन्थकारस्य अन्याः कृतयः**- श्रीकृष्णमित्रस्यान्याः कृतयोऽपि वर्तन्ते। तद्यथा -

(१) युक्तिरत्नाकरः
(२) वादचूडामणिः
(३) वादसुधाकरः
(४) शब्दकौस्तुभस्य भावप्रदीपटीका
(५) वैयाकरणभूषणसारस्य—रत्नप्रभाटीका
(६) तत्त्वमीमांसादयश्च ।

**वैशिष्ट्यम्** – हस्तगतप्रतीनामनुसारेणात्र टीकायाः कानिचन वैशिष्ट्यानि प्रतिपाद्यन्ते। तद्यथा-

- प्रथमं वैशिष्ट्यं त्वस्याः विस्तृतं सरलं च व्याख्यानं भवति, येन च सामामन्यमध्यमोत्तमोत्तमोत्तमाऽधिकारिणः समेऽपि पाठकाः अनुसन्धित्सवः लाभान्विताः भविष्यन्ति। वस्तुतः एतद्वैशिष्ट्यं रत्नार्णवेति नाम्नैव ज्ञायते। केवलं सन्धिपर्यन्तव्याख्यानमेवास्याः ६५ पुटेषु (१३० पृष्ठेषु) प्रसृतं वर्तते। एवम् अजन्तपुँल्लिङ्गप्रकरणपर्यन्तं चाहत्य ९८ पुटाः (१९६ पृष्ठानि) विद्यन्ते, तथैव तद्धितप्रकरणस्य पूर्वार्धं यावत् ८४ पुटाः (१६८ पृष्ठानि) सन्ति । अनेनानुमातुं शक्यते यदस्याः मातृकायाः विस्तारः कियानिति।

- अत्र मङ्गलाचरणस्य व्याख्यानेऽपि नूतनं तथ्यं प्रतिपादितं वर्तते यदन्यासु सिद्धान्तकौमुदीटीकासु नावलोक्यते तद्यथा-

- शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं नमस्कारात्मकं मङ्गलं विघ्नविघातार्थम् आचरन्नभिमतं प्रतिजानीते ***मुनित्रयमित्यादिना*** । ननु मध्यगुरुरूपस्य जगणस्य रोगदायकतया कथमस्य मङ्गलत्वम्। न च वर्ण्याभावान्न दोष इति वाच्यम्।

**वर्ण्यते नायको यत्र फलन्तद्गतमादिशेत्।**
**अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्**[40] **॥ इत्युक्तेः।**

न च यावत् काव्यलक्षणाभावान्नेदं काव्यमिति वाच्यम्। हीनाङ्गेषु यथा तवेदं शरीरन्दुष्टमित्युच्यते। न तु शरीरमेव नेति। एवं दुष्टस्यापि काव्यत्वे बाधकाभावात् कविकर्म हि काव्यम्। मैवम्। मुनिपदोपादानेनात्रादोषात्। तदाहुः –

**देवतावाचका ये च ये च भद्रादिवाचकाः।**
**ते सर्वे नैव दूष्याः स्युर्गणतो लिपितोऽपि च**[41] **॥ इति**

एवं ज्ञातुं शक्यते यत् प्रस्तुतटीकाकारस्य ज्ञानं केवलं व्याकरणशास्त्रं यावत् सीमितं नास्ति।

- प्रथममाहेश्वरसूत्रव्याख्यानेऽपि विस्तृतं व्याख्यानमत्र विहितं वर्तते। तत्र बहूनि नूतनतथ्यान्यपि वर्तन्ते, यानि च शेखररत्नाकरतत्त्वबोधिनीबालमनोरमादिष्वपि न वर्तन्ते। केषाञ्चन च विस्तारः अपि वर्तते। तद्यथा - ***अइउण् ॥*** आदिरन्त्येनेत्यनेनैकवाक्यतया अन्त्येन णकारादिना सहित आदि इकारादिर्मध्यगानां स्वस्य च संज्ञेत्यर्थात्संज्ञासूत्रमिदम्। अनुकार्यानुकरणयोरभेदविवक्षायाम् अर्थवत्ताभावान्नवर्णेभ्य स्वाद्युत्पत्तिः। कथं तर्हि

[40] (४९३४७) संख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः। पृ. - १

[41] तत्रैव।

अर्थवत्ताभावेऽनुकार्याणां बोध इति चेन्न । सादृश्यादनुकार्याणां बोधेऽपि वृत्तोपस्थापकत्वाभावात् । अपदन्न प्रयुञ्जीतेति निषेधस्तु न भवति । अपरिनिष्ठितं नेत्येव तदर्थात् । इह तु नित्यविध्यविषयतया परिनिष्ठितत्वात् । वाक्ये संहिताया अनित्यत्वात्सन्धिरपि न । वस्तुतस्त्वनुकरणे कार्यमात्रस्यैच्छिकतया नात्र सन्धिः । कारप्रत्ययोऽपि न । रोगाख्यायां ण्वुल्बहुलमित्यत्रोपसंख्यातत्वेन बाहुलकात् । किञ्चेह कारप्रत्ययस्य प्राप्तिरेव नास्ति । न हि वर्णात्कार इत्यत्र वर्णादुच्चार्यमाणात्कारप्रत्यय इत्यादिरर्थः । ककार इत्यादावज्झल्समुदायस्य वर्णत्वाभावे न कारप्रत्ययानापत्तेः । किन्तु इक्स्तिपौ धातुनिर्देश इत्यतो निर्देश इत्यनुवर्तते । इह तु आनुपूर्वीमात्रसम्पादने तात्पर्यम् । न तु प्रयोगस्थनिर्देशे । एवकार इत्यत्र घञन्तकृधातुना षष्ठीसमासः । केचित्तु उच्चैस्तरां वा वषट्कार इति निर्देशात्क्वचित्समुदायात्कारप्रत्यय इत्याहुः । वषट्कारकरणमित्यादिसिद्धये निर्देशाश्रयणमिति तदाशयः । नन्वकः.........ग्रहणं व्यर्थमेव [42]

- टीकाकारेण श्रीकृष्णमित्रेण शब्दकौस्तुभस्य भावप्रदीपनाम्नी टीकाऽपि विरचिता वर्तते । अतः अस्यां टीकायामपि तत्रत्यतथ्यानि प्रतिपादितानि सन्ति । तद्यथा – अइउण्सूत्रव्याख्यानप्रसङ्गे - "अइउण् इत्यत्र ह्रस्वमात्रवृत्तिजातिमात्रपरनिर्देशेन.........अत एव अणुदित्सवर्णस्येति सूत्रमस्त्विति तदाशयः । ***कौस्तुभे व्यक्तीकृतः । यत्तु अण्ग्रहणाभावे उपसर्गादृतीत्यत्र लृवर्णग्रहणे न स्यादिति कौस्तुभे उक्तं तन्न तपरस्तत्कालस्येत्यनेनापि लृवर्णग्रहणसंभवात्*** । वस्तुतस्तु उरण रपर इत्यादौ ऋकारलृकारयोः समाहारद्वन्द्वे सवर्णदीर्घनपुंसक- ह्रस्वयोरागमशास्त्रस्यानित्यत्वान्नुमभावे उरिति निर्देशादण् ग्रहणं व्यर्थमेव" ।

**शोधपत्रसारः -**

एवमस्मिन् प्रसङ्गे निष्कर्षरूपेण वक्तुं शक्यते यत् प्रत्येकं विदुषः भिन्ना भिन्ना शैली भवति । यदि कश्चन ग्रन्थस्य टीकां करोति चेत् सः तत्सम्बद्धाः अन्याः टीकाः अप्यवलोकयति । तासु यदि किञ्चित् स्फुटं नास्ति चेत् तत्र स्फुटं कर्तुं प्रयतते, अप्रतिपादितं प्रतिपादयति, स्वीयं च प्रामाणिकं मतं तत्रोपस्थापयति । तथैवात्रापि दृश्यते यद् अइउण् सूत्रव्याख्यानप्रसङ्गे शेखरकारेण सारगर्भितं सक्षिप्तं व्याख्यानं विहितम्, रत्नाकरकारेण चातीव विस्तरेण व्याख्यातम् , रत्नार्णवे इतोऽपि विस्तरेण व्याख्यानं विहितं वर्तते, नूतनतथ्यानि च तत्र प्रदत्तानि । यथा कारप्रत्ययविषये रत्नाकरकारेण न किमपि वर्णितम् , शेखरकारेणापि कारप्रत्ययोऽपि न बाहुलकात् इत्येवोक्तम्। किन्तु रत्नार्णवकारेण - किञ्चेह कारप्रत्ययस्य प्राप्तिरेव नास्ति...... इत्यारभ्य विस्तृतं नूतनं च तथ्यमुपस्थापितं वर्तते। सन्धिविषयेऽपि- **वस्तुतस्त्वनुकरणे कार्यमात्रस्यैच्छिकतया नात्र सन्धिः** इत्युक्तम्[43]। किन्तु रत्नाकरकारेण - **तस्मादुपजीव्यविरोधान्न यणादिकम् इति दिक्** [44]इत्युक्तम् । एवमेव शेखरकारेण च - **एषु संहिताया अविवक्षया न संहिताकार्यम्[45] इत्यारम्भ एवोक्तम् ।**

---

[42] (४९३४७) संख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः । पृ. -१

[43] ( ४९३४७) संख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः । पृ. ३, ४

[44] सिद्धान्तरत्नाकरेणभूषितायाः वैयाकरणसिद्धान्तकौमुद्याःप्रथमभागः, प्रो. आजादमिश्रः (मधुकरः) केन्द्रियसंस्कृतविद्यापीठम् , लखनऊ, प्रथमसं.-१९९५

[45] श्रीमन्नागेशभट्टः, लघुशब्देन्दुशेखर◌ः, 'श्री' हिन्दिव्याख्योपेत, व्याख्याकारः- डाँ. जयकान्तसिंहशर्मा, प्रथमसंस्करणम्- १९९८ ।



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

उपर्युक्तम् एतद् वैशिष्ट्यं तु केवलं प्रारम्भिकाणां केषाञ्चन पुटानामवलोकनेन ज्ञायते । इतोऽपि रत्नार्णवे रत्नानि भविष्यन्त्येव । तत् सर्वमनुसन्धानात् परमेव ज्ञास्यते । वस्तुतः यथा सागरः विस्तृतः गभीरश्च भवति तथैवेयं रत्नार्णवटीकाऽपि अन्वर्थसंज्ञेति प्रतीयते । एतया च टीकया पाठकानामनुसन्धित्सूनाञ्चोपकारः नूनमेव भविष्यतीति विभावयामि । इतोऽपि रत्नार्णवे कियन्ति रत्नानि सन्तीति तु सर्वमग्रिमेषु शोधपत्रादिष्वध्ययनात् परं यथावसरं शनैः शनैः प्रकाशयिष्यते ।

## सन्दर्भग्रन्थसूची

1) ४९३४७ - इत्यधिगमसंख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः ।
2) ४७४३५ - इत्यधिगम-संख्याका मातृका, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, मातृकासंग्रहालयः, प्रयागराजः ।
3) ३८०१०,३८४५०,३८५४०,३९३०५ इत्याद्यधिगमसंख्याकाः मातृकाः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालयः वाराणसी उत्तरप्रदेशः ।
4) ४८४३/३०२६ - इत्यधिगमसंख्याकाः मातृकाः "राजस्थान ओरियन्टल रिसर्च इन्स्टिट्यूट जोधपुर" संग्रहालयः राजस्थानम् ।
5) गङ्गानाथझापरिसरस्य नूतनमातृकासूचीपत्रम्, षष्ठः खण्डः, Descriptive Catalogue of Manuscripts Vyakaran Shiksha Nirukta Kosh (Vol.-VI) Edited by Prof. Sarvanarayan Jha, Dr. Beena Mishra and Dr. Ramkishor Jha First Ed. 2012
6) गङ्गानाथझापरिसरस्य शोधविषयसूचीपत्रम् ।
7) चौखम्बासंस्कृतसाहित्यम् (प्रकाशनसूचीपत्रम्) देहली, वाराणसी, २०१८-१९
8) बालमनोरमागर्भित – तत्त्वबोधिनी - लघुशब्देन्दुशेखरयोस्तुलनात्मकमध्ययनम् , डाँ.हरिकृपालु त्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसं. - २००७
9) मातृकासूचीपत्राणां नूतनसूचीपत्रम् New Catalogus Catalogorum (NCC) Vol.xxxix, University of Madras – 2015
10) श्रीमन्नागेशभट्टः, लघुशब्देन्दुशेखरः, 'श्री'- हिन्दिव्याख्योपेतः, व्याख्याकारः- डा. जयकान्तसिंहशर्मा, प्रथमसंस्करणम्- १९९८
11) सिद्धान्तरत्नाकरेणभूषितायाः वैयाकरणसिद्धान्तकौमुद्याः प्रथमभागः, प्रो. आजादमिश्रः (मधुकरः) केन्द्रियसंस्कृतविद्यापीठम् , लखनऊ, प्रथमसं. - १९९५
12) सिद्धान्तरत्नाकरेणभूषितायाः वैयाकरणसिद्धान्तकौमुद्याः द्वितीयभागः, प्रो. आजादमिश्रः (मधुकरः) रा.सं.सं.मा.वि.भोपालपरिसरः, प्रथमसं.-२००९ ।
13) सिद्धान्तरत्नाकरेण भूषितायाः वैयाकरणसिद्धान्तकौमुद्याः तृतीयभागः, प्रो. आजादमिश्रः (मधुकरः) सत्यम् पब्लिशिंग हाउस, दिल्ली, प्रथमसं. – २०१६
14) वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता (कारकप्रकरणान्ता) गिरिधरशर्माचतुर्वेदः, परमेश्वरानन्दशर्माविद्याभास्करः, मोतीलाल बनारसीदास, वाराणसी, सं. - २००१

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

# पुराणकाले नारीणां पाणिग्रहणसंस्कारः

**डॉ. दीपिका दीक्षितः**[46]

**प्रमुखशब्दाः**

**शोधसारः-** संस्कृतवाङ्मये पुराणानां विशिष्टस्थानं वर्त्तते। भारतीयसंस्कृतेर्मूलं पुराणेषु द्रष्टुं शक्यते पुराणेषु उक्तम्- पुराणं सर्वशास्त्राणां प्रथमं ब्राह्मणस्मृतम् इति।[47] इतिहास पुराणाभ्यां वेदं समुपवृंहयेत्।[48] इयम् उक्तिः प्राचीनकालादेव विद्वत्सु विख्यातास्ति। अथर्ववेदेऽपि निगतितम्- ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह उच्छिष्टा जज्ञिरे सर्वे।[49] पाणिग्रहणसंस्कारः षोडशसंस्कारेषु सर्वतो भद्रः संस्कारोऽस्ति। चतुर्षु पुरूषार्थेषु कामोऽप्येकः पुरूषार्थो भवति। मानवः प्रजाविस्तरेण स्वविस्तारम् अमरतां च गच्छति। ऋग्वेदे प्रार्थनेयं कृता यत् प्रजाद्वाराऽमृतत्वं मोक्ष्ये-प्रजाभिरग्ने अमृतत्वमश्याम्[50] इह शोधपत्रे नारीणां पाणिग्रहणविषये पुराणदृशा सविस्तरं चिन्तनं विहितं वर्तते।

प्रायेण गृह्यसूत्राणां प्रारम्भो विवाहसंस्कारेणैव भवति। गृहस्य मधुरस्नेहमयवातावरणं पत्न्या सह प्रेममयजीवनं तत्फलस्वरूपं सन्तानपालनपोषणं च वैदिकसमयेऽपि बहुमन्यमानमासीत्। पाणिग्रहणसम्पादनसमये वरवधूभ्यां कृते कथयति पुरोहितो यत् ‘त्वं मत्पतिना सह शतवर्षं यावत् सञ्जीव’ इति वरेणोक्तम् -**मया पत्या प्रजावति संजीव शरदः शतम्।**[51] विवाहः स्वयं यज्ञो मन्यते स्म। यो मानवो विवाहं कृत्वा गृहस्थजीवने न प्रविवेश स अयज्ञीयो वा यज्ञहीनश्च निगद्यते स्म- **अयज्ञीयो वा एष योऽपत्नीकः।**[52] वैदिकयुगे यज्ञोऽनिवार्य आसीत्। गृहस्थः स्नातकीभूय यज्ञाग्निं स्वगृहे प्रज्वालयामास, परं च यज्ञः पत्नीं बिना पूर्णो न भवति स्म। अतएव पाणिग्रहणसंस्कारः समेषां कृतेऽनिवार्य आसीत्। याज्ञवल्क्य एकपत्नीमरणानन्तरं यज्ञकर्मणि द्वितीयपत्न्यर्थं त्वरितं विवाहं कर्तुमादिशति -

**दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवनीं पतिः।**
**आहरेद्विधिवद्दारान्नग्निं श्चैवालिवम्बयन्॥**[53]

शबरस्वामिना गृहस्थाश्रममुपेक्ष्य याज्ञिकधर्मकर्मपालनं कृत्वा ब्रह्मचारिणां प्रखरतरशब्देषु निन्दा व्यधायि-

**अपुंस्त्वं प्रच्छादयन्तोऽष्टाचत्वारिंशदवर्षाणि ब्रह्मचर्यं चरितवतः।**[54]

यदा ऋणत्रयाणां सिद्धान्तस्य विकासोऽभवत् तदा विवाहस्य कृते अधिकाधिकमहत्त्वं पवित्रता च सम्भवत्। यतो हि पुत्रप्राप्तिं बिना पितृ-ऋणतो मुक्तिर्नहि भवति।

[46] प्राक्तनशोधच्छात्रा-केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ
[47] वायुपुराणम् – १/६०
[48] महाभारतम् - चि.१/२६७
[49] अथर्ववेदः -११/७/२४
[50] ऋग्वेद संहिता -५/४/१०
[51] ऋग्वेद संहिता -१४/१/५२
[52] तैत्तिरीयब्राह्मणम् -२/२/२/६
[53] याज्ञवल्क्य, अ. -२ विवाहप्रकरणम्, श्लोक-८९
[54] शाबरभाष्यम्,१/३/४



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

ऋग्वेदे पुत्रेच्छा अनेकस्थलेषु बहुलतया अभिव्यक्तीकृता आसीत्।[55] पाणिग्रहणमन्त्रेषु वरवधू द्वारा समुच्चारयति पुरोहित यद् उत्तमसन्तानाय तव पाणिग्रहणं करोमि।[56] पुरोहितो वरवधूकृते आशीर्वादं ददन् दशपुत्रोत्पादनस्याऽदेशं दत्तवान्।[57] महाभारते बहुस्थलेषु विवाहप्रयोजनं सन्तानोत्पादनमेव प्रादर्शि।[58] पाणिग्रहणसंस्कारेणैव त्रिवर्गस्य पूर्तिभवति।[59] मनुनाऽपि प्रोक्तम् -

**प्रजनार्थं स्त्रियः सृष्टाः सनतानार्थं च मानवाः।**
**तस्मात्साधाराणो धर्मः श्रुतौ पत्न्या सहोदितः॥**[60]

## नारीणां जीवने विवाहस्य प्रधानता

नारीजीवने विवाहस्य प्रधानतया बहुकारणानि भवन्ति। यथापुरूषः स्वतन्त्ररूपेण चतुर्विधपुरूषार्थसम्पादने सहचारिबिना समर्थो न भवति तथैव नार्यः अपि स्वरक्षार्थं योग्यसहचारिणं वाञ्छति। नारी जीवने विवाहस्य प्रधानतया प्रमुखकारणानि त्रीणि सन्ति -

1. नारीजीवनस्याबलात्वम्
2. आर्थिकपरावलम्बनत्वम्
3. चञ्चलस्वभावविवेकाभावत्वं चेति।

नारीणांभूषणं लज्जा सतीत्वं पातिव्रत्यं चास्ति। एषां रक्षा परमाऽवश्यकी वर्तते। शरीरिकोत्पादन दृष्टायाऽपि नारीशरीर संघटनं पुरूषोपेक्षया अत्यधिककोमलं तथा तासाम् आङ्गिकभेदोऽपि अवलात्वद्योतकोऽस्ति। नारीणाम अवलात्वसत्त्वे कारणं समये समये तासां संसारे कुदृष्टिपात एव। महाभारतनुसारं पतिहीनां स्त्रियमेव कामयन्ते सर्वेऽपि जनाः, मांसभोगिनो हि पक्षिणो भूमिपतितं मांसखण्डमिव-

**उत्सृष्टमामिषं भूमौ पार्थयन्ति यथा खगाः।**
**प्रार्थयन्ति जनाः सर्वे पतिहीनां तथा स्त्रियम्॥**[61]

भारतीयसंस्कृतौ नारीमर्यादा सदैव सर्वत्र संरक्षणीया तथा विशेषरूपेण ध्यानं प्रदेयम्। अत्र च विषये धर्मशास्त्राणां स्पष्टया अध्यादेशः -

**पिता रक्षति कौमारे भर्ता रक्षति यौवने।**
**रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥**[62]

मनुवत् पुराणेष्वुपि नारीणां संरक्षणं स्वतन्त्रता च पुरूषद्वारैव तथा तेषां निर्देशनाधारोपरि समभवत् -

**रक्षेत् कन्या पिता बाल्ये यौवने पतिरेव ताम्।**

[55] ऋग्वेद संहिता१/९१/२०;१/९१/१३
[56] ऋग्वेद संहिता१०/८/३६
[57] ऋग्वेद संहिता१०/८५/४५
[58] महाभारतम्३/९७/१९,९०
[59] मनुस्मृति९/१८
[60] मनुस्मृति९/९६
[61] महाभारतम्, अतिपर्व१६०/१२
[62] मनुस्मृति९/३

**वार्द्धक्ये रक्षयेत्पुत्रो ह्यन्यथा ज्ञातयस्तथा॥**[63]

अर्थात् कन्यारक्षा वाल्यावस्थानां पित्रा यौवने पत्या वृद्धावस्थायां पुत्रेण विधातव्या, पुत्रो यदि न स्यात्तर्हि ज्ञातिजनैरिति। आर्थिक पराबलम्बनमपि नारीणां जीविकोपार्जने सतीत्वसंरक्षणे च वाधकीमित्यर्थं स्त्रीजनैः पतिरूपे स्वजीवन सहचरो मृगितोऽन्वेषितश्चेति नारीणां चञ्चलप्रकृत्या सरलहृदयेन च कदापि ता दुष्टजनसंसर्गे समागत्य स्वाविवेकवुद्धितः सुदूरं यास्यन्तीति कृत्वा धर्मनीतिनिर्देशकैर्यथासमये धर्मनीति मर्यादायां विवाह स्त्रीजनो निबद्धः।

**विवाहस्याऽऽयुषो निर्णयः -**

कन्याया विवाहस्याऽऽयुः सम्बन्धे वैदिककालाद् पैराणिककालं यावद् विवेचनस्यात्यः आवश्यकता अनुभूयते। यतो हि एतत्प्रदर्शनम् आवश्यकं भवति यद् विभिन्न परिस्थितिषु कन्याविवाहस्या आयुषि किञ्चित् परिवर्तनं समुपलभ्यते न वा। कन्यायाः पूर्णशरीरिकविकासः पितृगृह एवासीत्।[64] सूर्यस्य पुत्र्याः सूर्याया विवाहः सोमेन सह तस्मिन्नेव समये सञ्जातो यदा सा युवतिरासीत् तथा पतिप्राप्तये समुत्सुकासीत्।[65] वोधायनगृह्यसूत्रानुसारं वधूजनस्य रजस्वला सम्भावनायां विचारः क्रियते।[66] रामायण-महाभारतसमयेऽपि विवाहसमये कन्याः प्रौढतां गता आसन् -

**पतिसंयोग सुलभं वयो दृष्ट्वा तु मे पिता।**
**चिन्तामभ्यगमद्दीनो वित्तनशादिवाधनः॥**[67]

स्मृतिकारैर्विवाहयोगकन्याः पञ्चश्रेणीषु विभज्यन्ते[68] प्रथमा नाग्निका, द्वितीया गौरी अष्टावार्षिका, तृतीया रोहिणी तथा नववार्षिका, चतुर्थी कन्या तथा दशवार्षिका, पञ्चमी रजस्वला तथा दशवर्षतोऽधिकायुष्मती। गोभिलः[69] तथा मानवगृह्यसूत्रकारो[70] नाग्निकां विवाहाय सर्वोत्तम मन्यते। ब्रह्मपुराणानुसारमपि शैशवावस्थायामे कन्याविवाहो विधातव्यः-

**यावल्लज्जां न जानाति यावत् क्रीडति पांसुभिः।**
**तावत्कन्या प्रदातव्या न चेत पित्रोरधोगतिः॥**[71]

अग्निपुराणेऽपीत्रसमुल्लेखो वर्त्तते -

**पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।**
**भुञ्जन्ते मानुषाः पश्चान्नैता दुष्यान्त केनचित्॥**[72]

---

[63] गरूड़पुराणम् - भागः अ.५५
[64] ऋग्वेद संहिता१०/८५/१२-२२
[65] ऋग्वेद संहिता१०/८५
[66] वोधायनः४/२/१६
[67] रामायणम्१/११९/३४
[68] पारस्करगृ१/४/५;या.स्.१/२२
[69] गोभिल स्मृतिः२/१
[70] मानवगृह्यसूत्रम्१/७/१२
[71] ब्रह्मपुराणम् -१६५/१३-१४
[72] अग्निपुराणम् -६७/१९





अस्यैवाधारोपरि विष्णुपुराणेऽपि कन्यावरूयोर्विवाहवस्थाया अनुपात 1/3 स्थापितम् -

**वर्षैरेकगुणां भार्यामुद्वहेत् त्रिगुणः स्वयम्।**[73]

पिता कन्याकृते स्वयंवरं रचयामास, अथवा अस्मिन् कर्मणि ताः स्वानुकूलं योग्यवरं स्वेच्छया अन्वेषयेयुः। उदाहरणार्थं कथयामो वयम् -

1. कृष्णस्य रूक्मिण्या सह विवाहः।[74]
2. अनिरूद्धस्य उषया सह विवाहः।[75]
3. काशीनरेशस्य सुबाहोः पुत्री शशिकला अयोध्यायाः भूपतेः ध्रुवसन्धेः पुत्रं सुदर्शनं स्वेच्छया वृतवती॥[76]
4. मन्दोदर्या अपि विवाहः स्वेच्छया बभूव। तस्या भगिन्या इन्दुमत्याः स्वयंवरोऽपि यौवनप्राप्त्यनन्तरमेव बभूव।[77]
5. सीताया विवाहोऽपि पूर्णयौवनप्राप्त्यनन्तरमेव समजनीति स्वयं सीताया वचसि श्रौतव्यम्। सा अनुसूयां प्रति समवोचत्।[78]
6. अर्जुनस्य सुभद्रया सह विवाहः।[79]
7. अर्जुनस्य सुभद्रया सह विवाहः।
8. सावित्री सत्यवत्तं स्वीकृतवती।[80]

पौराणिक युगस्य युवतिभिः स्वब्रह्मचर्यतपोबल धर्मभीतिसतीत्वरक्षायाः पालनकर्त्रीभिर्भतुः पितुश्चानुमतिं प्राप्य योग्यवरं प्राप्तवती आसीत्। प्रसङ्गेऽस्मिन् उषाऽनिरूद्धसंवादकथने उषावचनं श्रौतव्यम् –

**पिता ददाति कन्यां तां योग्याय च वराय च।**
**कन्या वरं न याचेत धर्म एष सनातनः॥**[81]

**विवाहस्य प्रकारः**

भारतीय धर्मग्रन्थेषु अष्टप्रकारस्य विवाहस्य समुल्लेखो दरीदृश्यते। ते चेत्थं सन्ति -

**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।**
**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥**[82]

उपर्युक्त अष्टाविधिविवाहस्य भागद्वयं विभज्य स्थापितम्। एषु विवाहेषु प्रथमाश्चत्वारः प्रशस्ताः कथ्यन्ते, इतरे चत्वारो विवाहा अप्रशस्ता भवन्ति। पुराणसमये अधिकतया प्रशस्तविवाहानामेव प्रचलनमासीत्।

---

[73] विष्णुपुराणम् -३०/१०/१६
[74] श्रीमद्भागवतम्, विष्णुपुराणम् (पञ्चमांशः)
[75] ब्रह्मवैवर्तपुराणम्, विष्णुपुराणम् (पञ्चमांशः)
[76] देवीभागवतपुराणम्- पूर्वार्धे तृतीयस्कन्धे एकोनिविंशोऽध्यायः, श्लोक. -९-१३
[77] देवीभागवतपुराणम्- पूर्वार्द्धम् पूस्कन्धः३-५
[78] रामायणम्१/११-/३४
[79] श्रीमद्भागवतपुराणम्
[80] देवीभागवतम् -अष्टस्कन्धे, अ.श्.०८
[81] ब्रहमवैवर्तपुराणम्
[82] मनुस्मृति३/१२

1. ब्राह्मविवाहः -ब्रह्मविवाहो विवाहस्य सर्वोत्तमा पद्धतिकथ्यते। अस्मिन् विवाहे कन्यायाः पिता गुणक्तं शीलवन्तं च वरमामन्त्र्य तं विधिवत् सत्कृत्य च दक्षिणया सह यथाशक्ति वस्त्राभूषणैरलङ्कृता कन्यां तस्मै अदात् -

**आच्छाय चार्चयित्वा च श्रुतिशीलवते स्वयम्।**

**आहूय दानं कान्याया ब्राह्मो धर्मः प्रकीर्तितः॥**[83]

स्मृतयः पुराणानि चास्य विवाहस्य सर्वप्रकारेण अधिकाधिक सम्मानं प्रशंसां च प्रकुर्वन्ति। पुराणेषु वणितः पार्वत्याः शिवेन सह विवाहः।[84] स्वायम्भुवमानोः कन्यायाः कर्दम् ऋषिणा सह विवाहः।[85] कर्दम-ऋषेः कन्याया अनुसूयाया विवाहः[86], सीताया रामेण सह विवाहः[87], मदालासायश्च विवाहः[88] - इमे सर्वे ब्रह्मविवाहाः सन्ति। दुर्वासमा सह कन्दलिन्या विवाहः[89], कृष्णेन सह राधाया विवाह इत्यादयश्च।[90]

2. दैवविवाहः - अस्मिन् प्रकारे कन्या पिता कन्याम् अलङ्कृत्य पौरोहित्य कर्मकारकाय श्रृत्विजे अदात्। श्रृत्विजे विवाहिते कर्मणि दधाद् अलङ्कृत्य स दैवः। वौधायन अनुसारं कन्या दक्षिणारूपेण प्रदीयते स्म -

**दक्षिणासु नीयमानास्वन्तर्वेद्यृत्विजे स दैवः।**[91]

अस्य दानस्य दैवयज्ञावसरे सत्त्वाद् अस्यैव नाम दैवविवाहः।

3. आर्षविवाहः - अस्मिन् कन्यायाः पिता वरसकाशाद् यज्ञादिधर्म विहितकार्य सम्पादयितुमेकां द्वयं वा गामादाय कन्यादानं करोति -

**एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।**

**कन्याप्रदानं विधिवद् आर्षो धर्मः स उच्चयते॥**[92]

धर्मनिमित्तो ह्यासौ सम्बन्धो न लोभनिमित्तकः। गोमिथुनग्रहणं च स्वयं कन्योपकरणदाना समर्थस्य तद्दानार्थे वेदितव्यम्।[93]

4. प्राजापत्यविवाहः - कन्यायाः पिता योग्यवरेण सह एतदुद्देश्य कन्यां विवाहयति यत् तौ साकं धार्मिक कर्त्तव्यं पालयेताम्।[94] सहधर्मं चरत इति प्राजापत्यः। मनोः अनुसारम्-

**सहोभौ चरतां धर्म प्राजापत्यः स ईरितः।**[95]

अस्या एव विवाहपद्धतेः पालनं सूत्रस्मृतिषु -पुराणकालेषु च ब्रहुमात्रायामासीत्।

---

[83] मनुस्मृति३/२७
[84] स्कन्दपुराणम्२६
[85] भागवतपुराणम्३/२२-२५
[86] भागवतपुराणम्६/२४२/२४६
[87] पद्मपुराणम्६/२४२/२४६
[88] मार्कण्डेयपुराणम्
[89] ब्रह्मवैवर्तपुराणम्-श्रीकृष्णजन्म खण्डः१४
[90] ब्रह्मवैवर्तपुराणम् - श्रीकृष्णजन्म खण्डः१५
[91] वोधायनस्मृतिः११/५
[92] मनुस्मृति३/२८
[93] वीरमित्रोदयसंस्कारः, भागः२
[94] आश्वलायनगृह्यसूत्रम्२/६
[95] स्कन्दपुराणम्- इब्रहमखण्डः, अ. छ. श्लोक.२८





5. आसुरो विवाहः - मनुरीत्या यस्मिन् विवाहे वराय कन्यायै सम्बन्धिनां च कृत यथाशक्तिधनादिकं दत्त्वा स्वेच्छया कन्यया सह विवाहो भवति स आसुर इति प्रोच्यते -

**ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शन्तितः।**

**कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उक्यते॥**[96]

बोधायनेन स्पष्टदेव प्रोक्तं, यद् धनक्रीता नारी पत्नीस्थानं नहि प्राप्तुं प्रभवति, सा तु केवलं दासीकल्पा नारी मन्तव्या-

**क्रीता द्रव्येण या नारी सा न पत्नी विधीयते।**

**सा न दैवे न सा पित्र्ये दासीं तां काश्यपोऽव्रवीत्॥**[97]

पुराणकाले त्वीद्दश विवाहपद्धतेः प्रचलनं कुत्रापि न परिद्दश्यते। भविष्यपुराणेऽपि प्रोक्तम् -

**न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि।**[98]

6. गान्धर्वविवाहः - मनुरीत्या कन्याया वरस्य च अन्योन्यानुरागेण स्वेच्छया यः परस्परसंयोगो भवति स एव गान्धर्व इति कथ्यते -

**इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च।**

**गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥**[99]

अस्या गान्धर्वविवाहपद्धत्याः प्रचलनं प्रायशः क्षत्रियेषु एवासीत्। उदाहरणार्थम् उषाऽनुरूद्धयोर्विवाहः[100], पुरूरवोर्वश्योर्विवाह[101] इत्यादयो विवाहा गान्धर्व्पद्धत्या समजनि। यतोहि मूलमस्य पारस्परिकाकर्षणे प्रेम्णि च निहितमस्ति -

**गान्धर्वमप्येके प्रशंसन्ति स्नेहानुगतत्वात्।**[102]

मारयित्वा क्षतविक्षतीकृत्य बलपूर्वकं हरणमेव राक्षसविवाह इति कथ्यते -

**हत्वा छित्वा च भित्वा च क्रोशन्तीं रूदतीं गृहात्**

**प्रसह्य कन्याकरणं राक्षसो विधिरूच्यते॥**[103]

क्षत्रियाणां कृते राक्षसविवाहः प्रशस्तः प्रदर्शितो भवति -

**"राक्षसं क्षत्रियस्यैकम्"।**[104]

**"गान्धर्वो राक्षसश्चैव धर्म्मो क्षत्रियस्य तौ स्मृतौ।**[105]

---

[96] मनुस्मृति३/३२
[97] वोधायनधर्मसूत्रम्
[98] भविष्यपुराणम्
[99] मनुस्मृति३/३२
[100] भागवतपुराणम्
[101] वायुपुराणम्९१
[102] गोभिलधर्मसूत्रम्
[103] मनुस्मृति
[104] भविष्यपुराणम्
[105] मनुस्मृति३/२६

कृष्णस्य रूक्मिण्या सह एवमेव विवाहः सञ्जातः।[106] नाभागेनापि सुप्रभया सह राक्षसपद्धत्या विवाहः कृतः।[107]

**प्रसह्य कन्याहरणाद् राक्षसो निन्दितः एताम्।[108]**

7. पैशाचविवाहः - अयं च सर्वाधिकनिकृष्टः प्रकार आसीत्। सुप्त प्रमुत्तविषमस्थितायाः कन्याया हरणमेव पैशाचविवाह इति। मनुरीत्या यश्च कश्चन मनुष्यः सुप्तया मत्तया कन्यया सह रमते स एव पैशाच इति -

**सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।**
**स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥[109]**

इक्ष्वामुपुत्रो राजा दण्डः शुकाचार्यस्य पुत्र्या अरजाया उपरि बलाद् अधिकारं कर्तुमैच्छत् परन्तु कन्या द्वारा पितृनिवेदनान्तरं शुक्रचार्यशापेन स नाशं गतः।[110] अपरं च

**छलेन कन्याहरणात्पैशाचो गर्हितोऽष्टमः।[111]**

यथा यथा मानवः शनै शनैः स्वप्रगतिपथं परिवर्धयामास तथा तथा तस्मिन् धार्मिक भावना परिवर्धते स्म। यस्य परिणामोऽयमेव सञ्जातो यद् विवाह संस्कारः केवलं सामाजिकवन्धनमेव न, अपि त्वेकानि कार्यधार्मिक कर्त्तव्यत्वेन ज्ञायते स्म। धर्माभिमानिनी भारतीयनारी आध्यत्मिक-आधिभौतिक-आधिदैविकेति त्रिविधोन्नतितः पथभ्रष्टा मा भर्वेदिति हेतोः शास्त्रेषु नारीजीवने विवाहस्य प्रधानता आवश्यकत्वेन पैराणिकेर्वुधवैरिति अङीकृतः।

## सन्दर्भग्रन्थसूची


- आर्. सेतुमाधवाचार्यः, वायुपुराणम्, मैसूरु : श्री जयचामराजेन्द्र ओडेयर्, 1947.
- आस्थानविद्वान् पाटणकर चन्द्रशेखरभट्टः, मार्कण्डेयपुराणम्, मैसूरु : श्री जयचामराजेन्द्र ओडेयर्, 1953.
- कुल्लुक भट्टः, मनुस्मृतिः पण्डित रामेश्वरभटट, वाराणसी : चौखंभासंस्कृत प्रतिष्ठानम्, 2015.
- चारुदेवशास्त्री, महाभारतवचनामृतम्, दिल्ली : परिमलपब्लिकेशन्स,1983
- दिह्निगि वंशीकृष्णः, पुराणलक्षणमीमांसा, मैसूरु : कणिवे प्रकाशन, 2018.
- दुर्गासप्तशतीः, रामनारायणदत्तशास्त्री गोरखपुरम् : गीताप्रेसः गोरखपुरम्, 2013.
- प. थानेशचन्द्र उप्रैति, विष्णुपुराणम्, देहली :परिमल पब्लिकेशन्, 2011.
- पि. एस्. शेषगिरि आचार्यः विद्वान् श्रीमद्भागवतम्, बेङ्गलुरु : पूर्णप्रज्ञाशोधमन्दिरम्, 2001
- बेट्टदपुर कृष्णप्प, ब्रह्मवैवर्तपुराणम्, श्री जयचामराजेन्द्र ओडेयर्, मैसूरु, 1950.
- महाभारतम्, गोरखपुर :गीताप्रेस, 2009


[106] भागवतपुराणम्
[107] मार्कण्डेयपुराणम् -१०
[108] स्कन्दपुराणम् व्रहमखण्डः
[109] मनुस्मृति३/३४
[110] वामनपुराणम्
[111] स्कन्दुपराण्मा् - 3 खण्डः, अ.4, श्लोक.-30



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010


- व्याससंहिता, प. श्यामसुन्दर त्रिपाठी, वाराणसी : चौखंभासंस्कृत भवनम्, 2008.
- श्रीमद्भागवतम्, गोरखपुर : गीताप्रेस, 2008
- श्रीमन्महाभारतम् , दिल्ली :नागपब्लिशर्स, 2005
- सुभाष विद्यालङ्कार, महाभारतसूक्तिसुधा, दिल्ली : प्रतिभाप्रकाशन, 2009

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-47-48 , **YEAR** 12, **VOL** -I, DOI-09-08-22 **Since 2010**

# Study Of Palāśa Plant on Indian Perspective

**Dr Ishwara Prasad A** [112]

**Key words :** *Palāśa*, Butea monospermic, flame of the forest.

**Abstract-** The paper is prepared for the study of *Palāśa* plant tracing its uses and benefits according to Indian tradition. The study is done on having literature survey identifying its botanical nature, ethnotherapeutics pharmacological uses and religious significance. In this study it is observed that the Palāśa plant having medicinal properties is being used in various religious performances. The importance of the plant is also identified through associating it to Moon, Purva constellation and Karkataka rasi. The study reveals that our ancient Indians had scientifically analyzed the tree and identified its proper use, giving religious touch.

The Plant Palāśa is native of Indian subcontinent and south east Asia, found throughout India and Burma, often gregarious Ceylon, North West Himalaya. Palāśa plant belongs to family **Leguminosae** fabaceae with botanical name **Butea monosperma [(Lam.) Taub.] with synonym B.frondosa,** having common names flame of the forest, bastard teak, and parrot tree. It is having synonyms as - पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः। क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः॥[1]

Palāśa is an erect, moderate - sized deciduous tree, reaching a height of 15 mts, with a cracked trunk and irregular branches. The bark is thick, fibrous, grey, exfoliating in small irregular pieces; exuding from cut and fissures a red juice which hardens into a ruby coloured gum or grey brown white or brown, if cut up fresh and quickly seasoned, soft and durable. The trunk is crooked and irregular. Young shoots are densely pubescent. The leaves are large, rachis slender pubescent when young, swollen at base, stipules small, linear - lanceolate deciduous. The leaflets are unequal, the terminal the largest and rhomboidal, orbicular, the lateral ones ovate-oval, dilated in lower half all very obtuse, glabrous above when mature, closely and finely tomentose and with much raised reticulation beneath. The flowers are large on velvety drooping pedicels, long, 2-3 together from the swollen nodes of rigid stout racemes coming off from woody tuberesities. The bracts are small, deciduous calyx finely velvety outside, lined

[112] Assistant professor, Dept of Sanskrit, Samhita & Siddhantha, SDM College of Ayurveda & Hospital Thanniruhalla, Hassan Karnataka - 573201



[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-47-48 , **YEAR** 12, **VOL** -I, DOI-09-08-22 **Since 2010**

with white silvery hair. Segments are acute. The keel is very deeply boat-shaped, acute. The pod is pendulous on a densely, woody stalk, obtuse thickened at sutures, leathery, transversely veined, densely but finely pubescent, especially at end. The seed is flat broadly oval, smooth reddish brown. The flowers are orange-scarlet, very silvery outside, with silky hair so that the buds are white.

**Chemical Composition**: Plant contains coumaran one glucoside palasitrin, monospermoside and isomonospermoside. Stem bark contains medicarpin, lupenone, lupeol, sitosterol, isoflavones 5-methoxygenisetin and prunetin. Leaves contain. Flowers contain flavonoids butrin, isobutrin, free sugars and free amino acids. Seeds contain palasonin, yields oil. Seed coat contains methylallophanic acid. Sap contains chalcone butein.

**Ethnotherapeutics:**

Various parts of the plant like Root, leaves, petioles, flowers, seeds and exudate are used in improving health by ancient Indians. In case of burning sensation in fever, the tender leaves of Palāśa, Badari or Nimba should be applied on the body to alleviate burning sensation. पलाशस्य बदर्या वा निम्बस्य मृदुपल्लवैः। अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम्॥[2]

**In diarrhoea d**ecoction of fruit (seeds) mixed with milk should be given followed by intake of warm milk according to strength. By this, impurity is eliminated and thus diarrhoea is checked. व्यत्यासेन शकृद्रक्तमुपवेश्येत योऽपि वा। पलाशफलनिर्यूहं युक्तिं वा पयसा पिबेत्॥ ततोऽनुकोष्णं पातव्यं क्षीरमेव यथाबलम्। प्रवाहिते तेन मले प्रशाम्यत्युदरामयः [3]॥ पलाशफलनिर्यूहं पयसा सह पाययेत्। ततो अनुपाययेत् कोष्णं क्षीरमेव यथाबलम्। प्रवाहिते तेन मले प्रशाम्यत्युदरामय। पलाशवत् प्रयोज्या वा त्रायमाणा विशोधिनी॥[4]

**During intrinsic haemorrhage :** a) One should take ghee cooked with the juice of Palāśa plant cooled and mixed with honey or the same processed with juice of Nyagrodhadi drugs. पलाशवृक्षस्वरसे विपक्वं सर्पिः पिबेत् क्षौद्रयुतं सुशीतम्। वनस्पतीनां स्वरसैः कृतं वा सशर्करं क्षीरघृतं पिबेद्वा॥[5] b) Ghee cooked with juice of Palāśa petioles and the paste of the same should be given with honey. It checks bleeding. पलाशवृन्तस्वरसे तद्गर्भे च घृतं पिबेत्। सक्षौद्रं तच्च रक्तघ्नं ॥[6] c) In Siddhabhesajamanimala (4.304) it is mentioned that flowers of Palāśa 160 gm mixed with double sugar should be taken with milk. It checks intrinsic haemorrhage and also preserves the beauty of woman[7].

**To eradicate worms :** a) Decoction of Palāśa seed or paste of the same with rice-water should be taken. पलाशबीजस्वरसं कल्कं वा तण्डुलाबुना॥[8] b) Decoction of Palāśa seed mixed

with honey or paste of the same with buttermilk should be taken. It destroys worms. पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम्॥ पिबेत्तद्बीजकल्कं वा मधुना क्रिमिनाशनम्।[9]

**In Colic :** Soup prepared with Palāśa mixed with sugar should be taken in colic. पलाशं धान्वनं वाऽपि पिबेद्यूषं ॥[10]

Vaidya manorama **mentions** Palāśa seeds, Udumbara fruits and Marica taken together alleviates cough within three days[11].

**Filaria :** Juice of Palāśa roots mixed with oil of yellow mustard in equal quantity should be taken[12].

Palāśa is useful in Eye diseases (Paittika conjunctivitis) a) Flowers of Palāśa should be rubbed with honey and used as collyrium. चूर्णं कुर्यादञ्जनार्थे रसो वा स्तन्योपेतो धातकीस्यन्दनाभ्याम्। योषितस्तन्यं शातकुम्भं विघृष्टं क्षौद्रोपेतं कैंशुकं चापि पुष्पम्॥[13] b) Exudate of Palāśa mixed with sugar and honey should be used as collyrium. पालाशं स्याच्छोणितं चाञ्जनार्थे शल्लक्या वा शर्कराक्षौद्रयुक्तम्॥[14]

c) Pilla semisolid extract of Palāśa flowers or Apamarga should be used as collyrium. रसक्रियां वा त्रिफलाविपक्वां पलाशपुष्पैः खरमञ्जरेर्वा॥[15]

In corneal opacity Karanja seeds impregnated many times with the juice of Palāśa flowers is made into a wick. Its application a collyrium destroys corneal opacity. पलाशपुष्प स्वरसैर्बहुषः परिभावितम्। करञ्जबीजं तद्वर्तिर्दृष्टेः पुष्पं विनाशयेत्॥[16]

In Paittika cataract, juice of Palāśa, Rohitaka and Madhūka mixed with honey and wine-scum should be made into semi-solid extract and then used as collyrium. पलाशरोहीतमधूकजा रसाः क्षौद्रेण युक्ता मदिराग्रमिश्रिताः॥[17].

**In Scorpion-sting,** Palāśa seeds impregnated with arka latex should be made into a paste and applied locally. It removes pain. पलाशबीजं शूलघ्नो लेपोऽर्क क्षीरभावितम्।[18].

**In Pumsavana o**ne leaf of Palāśa pounded with milk should be taken by the pregnant woman. It makes her achieve a powerful son. पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी। पीत्वा पुत्रमवाप्नोति वीर्यवन्तं न संशयः॥(चिकित्साप्रकरणम् 70.30)[19].

**As Rasayana** Palāśa seeds and Vidanga mixed with juice of Amalaki fruits, honey and ghee should be taken for a month. It makes the old young. पलाशबीजानि विडङ्गयुक्तान्युन्मिश्रितान्यामलकीफलानाम्। रसेन मध्वाज्ययुतानि पीत्वा वृद्धोऽपि मासात्तरुणत्वमेति॥ **As contraceptive** Palāśa seed is used. Palāśa seeds pounded finely and mixed with ghee and honey should be applied locally in vagina during season. It acts as contraceptive. ऋतौ घृतक्षौद्रयुतैः पलाशबीजैः प्रलेपं मसृणप्रपिष्टैः। करोति या स्त्री भगरन्ध्रमध्ये न सा भवेद् गर्भवती कदाचित्॥[20]



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

**Pharmacology :**

Palāśa flowers yield yellow dye. Flowers are antidiarrhoeic, diuretic, and antioestrogen. Leaves are astringent, diuretic, and aphrodisiac. Root and leaves clear the eyesight. Root or Flower juice is given to induce infertility in women. Petals are antifungal, used for diarrhoea, leprosy, haematuria in sheep. seed powder is anthelmintic and useful in ureteric calculus, delirium. Palasonin in seed is spasmogenic and is used for Ascarids, produce nausea, emesis, giddiness, colic nephrotoxic. Seed paste is rubefacient, used in ringworm and maggot wound. Bark is pungent, astringent, anthelmintic insecticide against house flies; useful in tumour and piles. Gum fresh is used for septic sore throat, haematuria and malaena.

**Devotional Importance**:

The Palāśa leaves are sacred to Narasimha. The plant is held sacred to Moon, Pūrva (Pubba, Hubba) constellation and Karkāṭaka rāśi. The flowers yield a brilliant but fleating yellow dye, much used in India, especially in the holi festival. Palāśa tree is sacred to soma (Moon). The flowers are offered to the gods. The Palāśa is sometimes represented as a sacred tree of Buddhists. This tree is supposed to be imbued with the immortalizing soma, the beverage of the gods. "This tree is supposed to have sprung from the feather of a falcon imbued with the soma"[21]. The trifoliate leaves, middle leaf-let is supposed to represent Visnu, the left Brahma and the right Shiva. The leaves are used as platters on the occasion of the Upanayana and chowla. The dry twigs used as Samidhas, during homa or sacred fire like Navagraha homa, vāstu - shanti; i,e. entrance into a newly built house or one acquired from a non-Hindu. The stem is used as a staff (daṇḍa) in upanayana.

Conclusion: Preservation of useful plants in India is observed since vedic period. Temple premises were also used to preserve plants considering many plants being used in patra-pūjā and puṣpa-pūjā. Palāśa plant is having its uses in ethnotherapy, pharmacology and also religiously. In India we observe the human friendly plants used both medicinally and religiously considering them eco-friendly.

**Endnotes**

1. Bhāvaprakāśanighaṇṭu P.535
2. Bhavaprakasha of Bhavamishra, Edited by Bhishagratna Pandit Sri Brahma Shankar Mishra, Cikitsāsthāna. 1.360.
3. Aṣṭāṅgahṛdaya Cikitsāsthāna 9.68-69
4. Caraka Samhita by Agnivesha, Edited by Vaidya Jādvaji Trivikramji Ācārya Cikitsāsthāna 19. 59.60
5. Suśrutasaṁhitā of Suśruta Uttarasthāna 45.29
6. Aṣṭāṅgahṛdaya Cikitsāsthāna 2.44
7. Siddhabhesajamanimala (4 VM.42.13304) as mentioned in Classical Uses of Medicinal Plants
8. Suśrutasaṁhitā of Suśruta Uttarasthāna 54.25.
9. Bhavaprakasha of Bhavamishra, Edited by Bhishagratna Pandit Sri Brahma Shankar Mishra, Cikitsāsthāna. 7.21
10. Suśrutasaṁhitā of Suśruta Uttarasthāna 42.107.
11. Vaidya manorama (3.16) as mentioned in Classical Uses of Medicinal Plants
12. Vaidya manorama (42.13) as mentioned in Classical Uses of Medicinal Plants
13. Suśrutasaṁhitā of Suśruta Uttarasthāna 10.9
14. ibid.10.7
15. ibid.12.50
16. Bhavaprakasha of Bhavamishra, Edited by Bhishagratna Pandit Sri Brahma Shankar Mishra, Cikitsāsthāna..63.205
17. Suśrutasaṁhitā of Suśruta Uttarasthāna 17.41
18. Ashtanga Sangraha Uttarasthāna.43.70
19. Bhavaprakasha of Bhavamishra, Edited by Bhishagratna Pandit Sri Brahma Shankar Mishra, Cikitsāsthāna.70.30
20. Classical Uses of Medicinal Plants by PV Sharma P. 234-235.
21. Sacred plants of India by Brahma Prakash Pandey

**Bibliography**

1. Suśrutasaṁhitā of Suśruta, Edited by Vaidya Jādvaji Trivikramji Ācārya & Nārāyaṇa Rāma Ācārya, Publication : Chaukhamba Sanskrit Sansthan Varanasi, Year 2015
2. Bhavaprakasha of Bhavamishra, Edited by Bhishagratna Pandit Sri Brahma Shankar Mishra, Publication : Chaukhamba Sanskrit Sansthan Varanasi, Year : 2003
3. Indian Medicinal Plants Volume 1, P.S Voarier's Arya Vaidya Shala Kottakkal Publication : Orient Longman, Year : 1995



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

4. Bhavaprakasha Nighantu of Sri Bhavamishra Commentary by Dr KC Chunekar, Edited by Dr GS Pandey, Published by Chaukhambha Bharati Academy Varanasi, Year : 2006.
5. Sacred plants of India Author : Brahma Prakash Pandey Publication : Sree Publishing House, 1049, Kotra Chhajju Pandit Model Basti, New Delhi. Year : 1989
6. Caraka Samhita by Agnivesha, Edited by Vaidya Jādvaji Trivikramji Ācārya, Publication : Chaukhambha Orientaliya Varanasi, Year : 2007
7. Ashtanga Sangraha of Vagbhata, Edited by Dr Shivaprasad Sharma, Publication : Chaukhamba Sanskrit Series Office Varanasi.
8. Medicinal Plants of India Volume 1 Karnataka, Author : SN Yoganarasimhan Publication : Interline publishing Pvt Ltd Bangalore Year 1996
9. Indian Medicinal Plants Author : B. D. Basu
10. The wealth of India, Publication : The Director CSIR New Delhi, Year : 1950
11. Classical Uses of Medicinal Plants Author : Priya Vrat Sharma Publication : Chaowkhambha Vishwabharathi Oriental Publishers and Distributers Varanasi, Year : 1999

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

# भारतीयज्ञानपरम्परायां शिक्षाशास्त्री व्यासः

**डॉ . सुशान्तहोता**[113]

**प्रमुखशब्दाः** - व्यास इति नाम्नः वैशिष्ट्यम् । व्यासस्य परिचयः । ज्ञानावतारः व्यासः । व्यासस्य कृतयः। व्यासोक्तदिशा शिक्षा चेत्यादयः ।

**शोधसारः-** प्राचीनकालादेव सकलभूतललोके अस्माकं भारतवर्षं ज्ञानगुरुरूपेण सुशोभितं पूजितञ्च वर्त्तते । अत्र सर्वेषामपि ज्ञानविज्ञानानां भाण्डागारः भवति अस्माकं संस्कृतवाङ्मयम् । संस्कृतवाङ्मयगङ्गाधारायां भारतीयसाहित्यानां ज्ञाननिधिरूपेण वैदिकसाहित्यानि लौकिकसाहित्यानि च निरन्तरं प्रवाहितानि दरीदृश्यन्ते । वेद-वेदाङ्ग-ब्राह्मण-आरण्यक-उपनिषदादीनि वैदिकसाहित्यान्तर्गतानि भवन्ति । वाल्मीकिव्यासभासकालिदासादीनां साहित्यानि च लौकिकसाहित्यरूपेण प्रथन्ते । मन्त्रद्रष्टारः ऋषयः स्वतपोबलेन ज्ञानचक्षुभ्यां दर्शं दर्शं संस्कृतवाङ्मयस्य मूलरूपं वेदं प्रणीतवन्तः । तदनु महर्षिः वाल्मीकिः रामायणरूपेण लौकिककाव्यं साहित्यं वा विरचयामास । एवं क्रमेण लौकिकसाहित्यस्य विकासोऽपि जातः । रामायणवत् व्यासकृतं महाभारतमहाकाव्यमपि लौकिकसंस्कृतवाङ्मयं सर्वथा परिपोषयति । किञ्च तत्प्रणीतश्रीमद्भागवतमहापुराणं ब्रह्मसूत्रञ्च लौकिकसंस्कृतसाहित्ये महन्महत्त्वं विभर्त्ति । एतेषां ग्रन्थरत्नानां परिशीलनेन प्रतीयते यत् आदिकविवाल्मीकिवत् पराशरात्मजः ब्रह्मविद् महर्षिव्यासोऽपि भारतीयज्ञानपरम्परायां समाजसुधारकरूपेण शिक्षाशास्त्रीत्वेन च ख्यातोऽस्ति । प्रस्तुते लेखेऽस्मिन् वयं महर्षिव्यासम् अधिकृत्य एतान् विन्दून् परिशीलयामः । यथा-

- व्यास इति नाम्नः वैशिष्ट्यम् ।
- व्यासस्य परिचयः ।
- ज्ञानावतारः व्यासः ।
- व्यासस्य कृतयः ।
- व्यासोक्तदिशा शिक्षा चेत्यादयः ।

**नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।**
**येन त्वया भारततैलपूर्णः प्रज्ज्वालितो ज्ञानमयो प्रदीपः ॥**

संस्कृतकाव्यकारेषु अन्यतमः, अत्यन्तं कुशाग्रबुद्धिसम्पन्नः, महाभारत-ब्रह्मसूत्र-अष्टादशपुराणानां प्रणेता, शिक्षाशास्त्री, समाजसुधारकः तपोनिष्ठः महर्षिव्यासः स्वज्ञानज्योतिभिः जगत्सर्वं प्रज्ज्वालयति प्रकाशयति च । भारतीयज्ञानपरम्परायाम् एतावत् पर्यन्तं ये केचन विविधप्रतिभाविमण्डिताः कवयः प्रादुर्भूताः तेषु अयं व्यासः शिक्षाशास्त्रित्वेन समाजसुधारकत्वेन च समाजे स्वप्रतिष्ठां प्रतिष्ठापयति । तत्प्रणीतब्रह्मसूत्र-महाभारत-पुराणादिषु

[113] प्राध्यापकः, (शिक्षाशास्त्रविभागः), केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीसदाशिवपरिसरः, पुरी, ओडिशा





वर्णिताः सर्वेऽपि आध्यात्मिक-सांस्कृतिक-सामाजिक-राजनैतिकविषयाः समाजे सामाजिकपरिवर्त्तनम् आनेतुं सक्षमाः भवन्ति । स्वजीवनकालाभ्यन्तरे असौ आभारतं विविधेषु आश्रमेषु स्थलेषु च गत्वा जनान् बोधयति स्म । व्यासस्य व्यक्तित्वेन कृतित्वेन च प्रभाविताः नैके कवयः तस्य काव्यानि उपजीव्यकाव्यरूपेण स्वीकृत्य नैकान् ग्रन्थान् विरचयन्ति ।

**व्यास इति नाम्नः वैशिष्ट्यम् -**

व्यसति विस्तारयति इति व्यासः । अनया व्युत्पत्त्या भारतीयज्ञानविज्ञानस्य वेदार्थस्य विस्तारकः व्यास इति ज्ञायते बुध्यते च । यज्ञकार्यसम्पादनार्थं व्यासः वेदान् विभज्य संहिताचतुष्टयेषु व्याख्यातवान् इति हेतोः वेदव्यासनाम्ना तथा च संक्षेपेण व्यासनाम्ना विख्यातः । एवं प्रकारेण सः सर्वलोककल्याणाय दुर्बोध्यान्यपि सकलानि वैदिकतत्त्वानि काव्यपुराणादिभिः सरलं चकार । तदुक्तं महाभारते-

**ब्रह्मणो ब्रह्मणानां च तथानुग्रहाकाङ्क्षया ।**
**विव्यास वेदान् यस्मात्स तस्माद्व्यास इति स्मृतः ॥**) महाभारतम्1 -/66/(88

नैकैः नामभिः अभिहितः भगवान् व्यासः । यमुनायाः कस्मिँश्चित् द्वीपे जातत्वात् सः द्वैपायनः इति ख्यातः । तदीयशरीरस्य कृष्णवर्णत्वात् कृष्णमुनिः इत्यपि तस्य प्रसिद्धिः । उभयोः पदयोः एकीकरणेन सः कृष्णद्वैपायन इत्यपि विश्रुतः । पुनश्च असौ हिमालयस्याङ्गभूते वदरिकाश्रमे स्थित्वा ग्रन्थरत्नानां रचनया निमग्नोऽभूत् । तस्मात् वादरायण इति विदितः । किञ्चायं पराशरमुनेः सम्भवात् पाराशर्य इत्यपि ख्यातः ।

**व्यासस्य परिचयः -**

महाभारतवचनानुसारं व्यासः सत्यवतीगर्भसम्भूतः महामुनेः पराशरस्य आत्मजः आसीत् । ब्रह्मणः मानसपुत्रेण वसिष्ठेन सह अस्य सम्बन्धः । अस्य परिवारिकपरम्परा प्रख्यातपद्ये एवं निर्दिष्टमस्ति । यथा -

**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।**
**पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥**

ब्रह्मा
↓
वशिष्ठः
↓
शक्तिः
↓
पराशरः
↓
व्यासः -कृष्णद्वैपायनः
↓
शुकदेवः

वर्त्तमानयुगीयव्यासस्य अयं परिचयः उपर्युक्तप्रकारेण प्राप्यते।

परन्तु इतः पूर्वम् अपि अनेके व्यासाः अभूवन् इति विष्णुपुराणे )3/3/7-8(, देवीभागवते )1/3/24-35 (च स्पष्टं उल्लिखितमस्ति। व्यासः कस्यापि व्यक्तेः अभिधानं नास्ति परन्तु एका पदवी भवति। अयम् उपाधिधारी प्रतिद्वापरयुगम् आविर्भवति। यथोक्तं तेन -

**द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने।**

**वेदमेकं सुबहुधा कुरुते जगतो हितः॥**

(विष्णुपुराणम् –3/3/5

अपि च - **द्वापरे द्वापरे विष्णुर्व्यासरूपेण सर्वदा।**

**वेदमेकं स बहुधा कुरुते हितकाम्यया॥**

(देवीभागवतम् -3/19

**ज्ञानावतारः व्यासः-**

यदा यदा संसारे धर्मस्य ग्लानिर्जायमाना दृश्यते तदा तदा धर्मसंस्थापनाय भगवान् स्वयमेव धरातलमवतरति। महर्षिः व्यासोऽपि भगवत्सरूपः। द्वापरयुगस्य अन्तिमचरणे पापानां प्रावल्यात् पुण्यानां पुण्यशालिनाञ्च क्षीणत्वात् मानवानाम् आयुः, मानसिकक्षमता आध्यात्मिकशक्तयश्च सम्पूर्णं नष्टं गताः। वैदिकज्ञानसम्पन्नाः संस्कृतिप्रेमिणश्च दुर्लभाः सञ्जाताः। वैदिकयागयज्ञानुष्ठानानि विलुप्तानि। अतः सर्वज्ञः सर्वशक्तिमान् सर्वान्तर्यामी भगवान् स्वयमेव जगतः कल्याणाय ब्रह्मर्षेः वशिष्ठस्य पौत्ररूपेण पराशरसत्यवतीसुतत्वेन जनिमलभत।

अयं महर्षिः व्यासः साक्षात् ▫ज्ञानस्यप्रतिमूर्त्तिः आसीत्। सर्वविधलौकिकपारलौकिकज्ञानैः सः दीप्तिमान् आसीत्। तस्य समग्ररचनाजातं परिशील्य संस्कृतसाहित्यसमीक्षकाः समाजशास्त्रविदश्च महात्मानमेनम् अनन्यमसाधारणं तथा च भगवतः ज्ञानस्य अवतारः इतिप्रमाणयन्ति। वाचस्पतिमिश्रेण भामत्यां मङ्गलश्लोके एतदेव प्रमाणितं वर्त्तते। तद्यथा -

**ब्रह्मसूत्रकृते तस्मै वेदव्यासाय धीमते।**

**ज्ञानशक्त्यवताराय नमो भगवते हरेः॥** इति।

पुनश्चायं भगवान् व्यासः स्वगुणगौरवेण सर्वान् कवीन् अतिशेते। ब्रह्म-विष्णु-महेश्वराणां त्रयाणां देवानां महनीयं स्वरूपं तस्य व्यक्तित्वे उद्भासितं भवति। तस्मात् अयं त्रिदेववद् वन्द्यते। तदुक्तम्-

**अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।**

**अभाललोचनः शम्भुर्भगवान् वादरायणः॥**

**व्यासस्य कृतयः -**

**त्रिभिः वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः।**

**महाभारतमाख्यानं कृतवान् इदमुत्तमम्॥**) महाभारतम्-1/56/32(

संस्कृतसाहित्यजगतः सुप्रसिद्धं महाकाव्यं महापुराणं वा महाभारतं कृष्णद्वैपायनेन महामुनिना व्यासेन महता श्रमेण त्रिभिः वर्षैः विरचितमिति तत्रैव तस्य ग्रन्थे स्वयमुद्घोषितम्। सम्भवतः अष्टादशपुराणानां रचनायारनन्तरमेव सः महाभारतं व्यरचयत् इति ज्ञायते। तथाहि महाभारतस्य आदिपर्वणि लिखितं यत् -



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

**अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।**

**पश्चाद्भारतमाख्यानं चक्रे तदुपबृंहितम्॥**

अस्य महाभारतस्य वैशिष्ट्यं सर्वजनविदितम्। सरलया मधुरया गिरा वैदिकसंहितायाः दुरुहार्थकतत्त्वानि, सामाजिकजीवनसम्बद्धानि तथ्यानि, भारतवर्षस्य संस्कृति-सभ्यता-परम्परा-आचार-विचार-मूल्य-लोकव्यवहार-सिद्धान्तान् मञ्जुलप्राञ्जलतया वर्णयति। महाभारतस्य सांस्कृतिकं, ऐतिहासिकं, सामाजिकं, राजनैतिकं, साहित्यिकम्, आलङ्कारिकं, धार्मिकम्, आध्यात्मिकञ्च महत्त्वं सर्वोपरि महत्तां विधत्ते। सामाजिकजीवनस्य सर्वेषां प्रश्नानाम् उत्तराणि तत्रैव प्राप्यन्ते। समाजे पथभ्रन्तः मानवः महाभारतोक्तानि जीवनमूल्यानि स्वीकृत्य सदा सन्मार्गम् अधिगच्छति। तस्मात् उच्यते-

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ॥**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**

(महाभारतम्-1.62.53

किञ्च महाभारतस्य सुविशालं महनीयं च स्वरूपं तन्महत्त्वं प्रख्यापयति। तदर्थं महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते इति प्रसिद्धिः। विश्वजनवन्दिता महाभारतस्य भीष्मपर्वान्तर्गता पद्मनाभमुखनिःसृता श्रीमद्भगवींता तदीयम् आध्यात्मिकमहत्त्वं वरीवर्त्तते।

व्यासेन न केवलं महाभारतम् अपितु सुविशालं पुराणसाहित्यमपि प्रणीतमस्ति। असौ वेदार्थतत्त्वं व्याख्यातुम् अष्टादशपुराणानाम् उपपुराणानां च रचनां चकार। महाभारतवचनाद् वेदार्थतत्त्वं पुराणादिभिः उपबृंह्यते। पुराणानां महत्त्वविषये उल्लिखितं वर्त्तते यत्-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**

**विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥** इति।

किञ्च नारदीयपुराणेऽपि पुराणानां महत्त्वं वर्णितं दृश्यते। यथा-

**वेदार्थादधिकं मन्ये पुराणार्थं वरानने।**

**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।** (नारदीयपुराणम् -2/24/17)

भगवता व्यासेन रचितानाम् अष्टादशसंख्याकानां पुराणानां नामानि एकेन पद्येन एवं निर्दिष्टम् अस्ति। यथा-

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**

**अनापलिङ्गकूस्कानि पुराणानि प्रचक्ष्यते॥**

तत्र मकारादिना मत्स्यपुराणं मार्कण्डेयपुराणं च, भकारादिना भागवतपुराणं भविष्यपुराणं च, ब्रत्रयेण ब्रह्मपुराणं, ब्रह्मवैवर्त्तपुराणं ब्रह्माण्डपुराणं च, वचतुष्टयेन वामनपुराणं, विष्णुपुराणं, वायुपुराणं, वराहपुराणम्, अनापलिङ्गकूस्कानि इत्यनेन अग्निपुराणं, नारदपुराणं, पद्मपुराणं, लिङ्गपुराणं, गरुडपुराणं, कूर्मपुराणं, स्कन्दपुराणं चेत्यादीनि प्रथन्ते। पुनश्च परवर्त्तिकाले कुमार-नरसिंह-वायु-शिवधर्म-दुर्वासस्-आश्चर्य-नारद-नन्दिकेश्वर-अशनस्-कपिल-वारुण-शाम्ब-कालिका-माहेश्वर-कल्कि-देवी-पाराशर-मरीचि-भास्कराख्यानि अनेकानि पुराणानि तस्य नाम्ना रचितानि दृश्यन्ते। एतेषु सर्वेषु पुराणेषु श्रीमद्भागवतमहापुराणं ज्ञानस्य निष्कामकर्मणः भक्तेश्च सङ्गमस्थलं मन्यते। पुनश्च वेदव्यासप्रणीतस्य ब्रह्मसूत्रस्य भाष्यमेव भागवतमिति समीक्षकाः वदन्ति। एतेषु पुराणेषु भारतीयसंस्कृतेः सभ्यतायाश्च यथार्थतो वर्णनं दृश्यते

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
URL- www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-47-48 , **YEAR** 12, **VOL** -I, DOI-09-08-22 | **Since 2010**

। तस्मात् पञ्चमवेदत्वेन पुराणानां महत्वम् अस्तीति कथितं श्रीमद्भागवते **इतिहासपुराणं च पञ्चमो वेद उच्यते** इति। किञ्च वायुपुराणे उद्घोषितं यद् चतुर्वेद-वेदाङ्ग-उपनिषदां ज्ञाताऽपि पुराणज्ञानविहीनः जनः न कदापि विचक्षणः भवति। यथोक्तं तेन –

**यो विद्यात् चतुरो वेदान् साङ्गोपनिषदो द्विजः।**
**न चेत् पुराणं स विद्यात् नैव सः स्यादविचक्षणः॥**

इदानीमपि महाभारतीययुगस्य पुराणयुगस्य च प्रभावः समाजे परिलक्ष्यते। पुराणेषु व्याकरणं, छन्दः, ज्योतिषं, धर्मशास्त्रम्, आयुर्वेदः प्रभृतीनां शास्त्रीयं वैज्ञानिकं च महत्त्वं प्रतिपादितमस्ति।

महाभारतं पुराणञ्च अतिरिच्य भगवता व्यासेन सूत्रात्मकशैल्या वेदान्ततत्त्वप्रतिपादकं ब्रह्मसूत्रम् इति ग्रन्थोऽपि प्रणीतः। उच्यते यत् -वेदान्त नाम उपनिषत्प्रमाणम्। उपनिषदां मन्थनं कृत्वा सः ज्ञानस्य यत् नवनीतं प्रस्तुतवान् तदेव भवति ब्रह्मसूत्रम्। वेदान्तदर्शनस्य आधारभूमिरिति ब्रह्मसूत्रं परिगण्यते। ब्रह्मसूत्रम्, गीता उपनिषद् च प्रस्थानत्रीरूपेण प्रथन्ते। **अथातो ब्रह्मजिज्ञासा** (1/1/1 (इति सूत्रेण ब्रह्मसूत्रस्य आरम्भः जातः तथा च समाप्तिः **अनावृत्तिः शब्दादनावृत्तिः शब्दात्** (4/4/22 (इत्यनेन सूत्रेण सञ्जाता। चतुर्भिः अध्यायैः विभक्तं ब्रह्मसूत्रमेतत्। प्रत्यध्यायं चत्वारः पादाः राजन्ते। 555 सूत्रैः ग्रथितोऽयं ब्रह्मसूत्रग्रन्थः ब्रह्मतत्त्वजिज्ञासूनां वेदान्ततत्त्वरहस्यविदाञ्च कृते आलोकस्तम्भरूपेण मार्गं दर्शयति। वदरिकाश्रमे उषित्वा एव व्यासः एतस्य ग्रन्थस्य रचनां कृतवान् इत्यतः एतत् वादरायणसूत्रम् इति प्रसिद्धिं लभते।

**व्यासोक्तदिशा शिक्षा -**

प्राचीनभारतीयशिक्षाशास्त्रीषु तपोनिधिः व्यासः शिखरं स्थानं परिचुम्बति। आध्यात्मिकतादात्मीकरणप्रक्रिया एव शिक्षा इति अस्य अभिमतम्। पुनश्च येन साधनेन ब्रह्मज्ञानस्य प्राप्तिर्जायते मानवः मुक्तिं च लभते सा शिक्षा इति। एवमेव असौ स्वकृतिषु शिक्षायाः सम्प्रत्ययेन सह सर्वान् शिक्षणसिद्धान्तान्, समाजशास्त्रीयसिद्धान्तान् च विस्तृतरूपेण विवेचयति। शिक्षायाः तात्पर्यं, महत्त्वं, लौकिकानि पारलौकिकानि च उद्देश्यानि, शिक्षार्थिनां पाठ्यचर्यायाम् शिक्षणीयाः विषयाः, शिक्षणविषयाणां तत्त्वानाञ्च अवबोधनाय अधिगमाय च शिक्षणविधयः, आचार्याणां गुणाः, व्यक्तित्वं कर्तव्यम् उत्तरदायित्वञ्च, शिक्षार्थिनां गुणाः व्यक्तित्वं कर्तव्यम् उत्तरदायित्वञ्च, गुरुशिष्यसम्बन्धः, विश्वस्य, राष्ट्रस्य, समाजस्य च कल्याणाय उभयोः शिक्षकशिक्षार्थिनोः किं योगदानम्, शिक्षासंस्थानां वातावरणं कीदृशं भवेत् इत्येते सर्वे विषयाः प्रतिपादिताः वर्तन्ते। किञ्च समाजे सामाजिकैः सह सम्बन्धं संस्थाप्य उत्तमं जीवनयापनं कथं कर्तव्यम्, समाजे सामाजिकं परिवर्त्तनं कथम् आनेतव्यम् इत्येतान् अपि सिद्धान्तान् द्योतयति। तत्प्रदत्तं राजनैतिकं ज्ञानम् उत्कृष्टसमाजस्य प्रगतिशीलराष्ट्रस्य च निर्माणाय सदैव सहायकं भवति। सः प्रतिभावान् मनोवैज्ञानिकोऽपि भवति। अध्यापकाः मनोवैज्ञानिकरीत्या छात्राणां सर्वाः परिस्थितीः परिशील्य तान् पाठयेयुः, उचितपरामर्शेण निर्देशनेन च तेषां समस्यासमाधाने सन्नद्धाः भवेयुरिति शिक्षाशास्त्री व्यासः दिग्दर्शनं ददाति। एवमेव तस्य सर्वासु कृतिषु लोकोपकारकाणि शैक्षिकतत्त्वानि बहुलतया प्राप्यन्ते।

**उपसंहारः -**

मानवसमाजं सत्पथे प्रवर्तयितुं परमशिक्षाशास्त्रिणः भगवतः व्यासदेवस्य अमूल्यशैक्षिकोपदेशः भारतीयज्ञानपरम्परायां विशिष्य संस्कृतवाङ्मये निहितः। तस्मात् संस्कृतवाङ्मयस्य निर्मातृषु अस्य नाम अमरस्थानं बिभर्ति। व्यासस्य रचनामाधारीकृत्य परवर्त्तिनि काले अद्यावधि च संस्कृतकाव्यकाराः बहुविधानि



[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
URL- www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-47-48 , **YEAR** 12, **VOL** -I, DOI-09-08-22 | **Since 2010**

काव्यनाटकानि विरच्य संस्कृतसाहित्यस्य समृद्धिं संसाधयन्ति। आधुनिकसमाजस्य समाजशास्त्रिणः व्यासकालीनं समाजं परिशील्य सांप्रतिकसमाजे तदुपादेयतां प्रकटयन्ति। तत्कृतिषु उपस्थापिताः सर्वे समाजशास्त्रीयसिद्धान्ताः, लोकव्यवहाराः, शैक्षिकोपदेशाश्च इदानीमपि मानवसमाजं दिग्दर्शनं प्रयच्छन्ति। अद्यत्वे वैज्ञानिकयुगेऽपि छात्रेषु नैतिक-चारित्रिक-आध्यात्मिक-धार्मिक-सामाजिकविकाससम्पादनाय अस्य रचनाः सहायकाः भवन्ति। इदानीं राष्ट्रियशिक्षानीतिः 2020 भारतीयज्ञानपरम्परायां प्राचीनभारतीयशिक्षाप्रणाल्याञ्च अधिकं महत्वं ददाति। अतः भारतीयशिक्षाक्षेत्रे विविधस्तरीयपाठ्यचर्यासु महर्षेः व्यासस्य विषयाः अवश्यमेव संयोजनीयाः संस्मरणीयाश्चेति दिक्।

## सन्दर्भग्रन्थसूची


| Sl | First Name of Author | Last Name | Title | Editor | City | Publication | Year |
|---|---|---|---|---|---|---|---|
| 1 | | | महाभारतम् | | गोरखपुर | गीताप्रेस् | 2009 |
| 2 | | | श्रीमन्महाभारतम् | | दिल्ली | नागपब्लिशर्स | 2005 |
| 3 | चारुदेव | शास्त्री | महाभारतवचनामृतम् | | दिल्ली | परिमलपब्लिकेशन्स् | 1983 |
| 4 | सुभाष | विद्यालङ्कार | महाभारतसूक्तिसुधा | | दिल्ली | प्रतिभाप्रकाशन | 2009 |
| 5 | पि .एस् .शेषगिरि | आचार्यः विद्वान् | श्रीमद्भागवतम् | | बेङ्गलुरु | पूर्णप्रज्ञाशोधमन्दिरम् | 2001 |
| 6 | | | श्रीमद्भागवतम् | | गोरखपुर | गीताप्रेस् | 2008 |

# पुराणेषु सर्गः

**गौरी पि**[114]

**प्रमुखशब्दाः** -सर्गः, सृष्टिः, प्राकृतः, वैकृतः, तिर्यक्, अनुग्रहः, वैकारिकः, भूतः, ब्राह्मः इत्यादयः

**शोधसारः-** आधुनिकभारतीयसमाजोद्धाराय पुराणानि आधारपीठानि। प्रथमतः पुराणेषु विद्यमानविषयाध्ययनाय पुराणस्य पञ्चलक्षणानां ज्ञानमावश्यकम्। तानि सर्गः, प्रतिसर्गः वंशः, मन्वन्तरः, वंशानुचरितञ्च इति लक्षणानि उक्तानि।

तेषु सर्गः प्रथमः। सृष्टिं विना जगतः स्थितिः दुस्साध्यहेतुरेव। एतादृशस्सर्गः केषु केषु च पुराणेषु, कथं वा व्याख्यात इति अस्मिन् प्रबन्धे व्याख्यास्यते। त्रिगुणात्मिकायाम् अस्यां प्राकृतौ जायमानासमासक्षोभात् महत्तत्त्वस्याविर्भावः, ततः अहङ्कारः, तत एकादशेन्द्रियाणि पञ्चतन्मात्राश्च, ततः पञ्चमहाभूतानाम् उत्पादनमेव सर्ग इति पुराणानि बोधयन्ति।

श्रीमद्भागवते प्रमुखतया सर्गस्य त्रैविध्यम् कथितं दृश्यते। स च सर्गः प्राकृतसर्गः, वैकृतसर्गः, उभयात्मकसर्गश्चेति। एतेषां सर्गाणां भेदोपभेदाश्च अत्र चर्चिताः।

**भूमिका -**

आधुनिकभारतीयसमाजोद्धाराय पुराणानि आधारपीठानि। प्रथमतः पुराणेषु विद्यमानविषयाध्ययनाय पुराणस्य पञ्चलक्षणानां ज्ञानमावश्यकम्। तानि च लक्षणानि एवमुक्तानि -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**[115]

अत्र सर्गो नाम जगत्सृष्टिः। प्रतिसर्गो नाम दृश्यमानस्य समस्तविश्वस्य प्रलयः। वंशो नाम ब्रह्मोत्पन्नाः देवर्षिमनुष्याणामुत्पत्तिपरम्परा। मन्वन्तरं नाम सृष्ट्यादीनां कालव्यवस्थापनम्। वंशानुचरितं नाम तत्तद्वंशभवानां राज्ञां राजर्षिणां महर्षिणां च विषये यद्वक्तव्यं तद्विवरणोपस्थापनञ्चेति एतेषामर्थः फलत्येव।

तेषु सर्गः प्रथमः। सृष्टिं विना जगतः स्थितिः दुस्साध्यहेतुरेव। एतादृशस्सर्गः केषु केषु च पुराणेषु, कथं वा व्याख्यात इति अग्रे चर्चयामः।

**सर्गः -**

त्रिगुणात्मिकायाम् अस्यां प्राकृतौ जायमानासमासक्षोभात् महत्तत्त्वस्याविर्भावः, ततः अहङ्कारः, तत एकादशेन्द्रियाणि पञ्चतन्मात्राश्च, ततः पञ्चमहाभूतानाम् उत्पादनमेव सर्ग इति पुराणानि बोधयन्ति।

**अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः।**

[114] एम्.ए., डिप् इन् हस्तप्रतिशास्त्रम्, संशोधनसहायिका, प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः, मैसूरु
[115] ब्रह्मवैवर्तपुराणम् १३१.५





**भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते॥**[116]

श्रीमद्भागवतस्य तृतीयस्कन्धस्य दशमेऽध्याये प्रमुखतया सर्गस्य त्रैविध्यं कथितं दृश्यते। स च सर्गः प्राकृतसर्गः, वैकृतसर्गः, उभयात्मकसर्गश्चेति।

प्रकृतेः स्वभावात् य उत्पद्यते सः प्राकृतसर्गः। विकृतेः स्वभावात् ब्रह्मणा य उत्पद्यते स वैकृतसर्गः। यः सर्गः प्राकृतवैकृतोभयात्मको भवति स उभयसर्ग इति वक्तुं शक्यते।

प्राकृतसर्गः पुनः षडुपविभागेषु विभक्तः। एवमेव वैकृतसर्गोऽपि विभागत्रये तथा उभयात्मकसर्ग एक एवेति दृश्येते। सर्वे आहत्य सर्गाः दशप्रकारा इति पुराणेषु दृश्यते।

**आद्यस्तु महतस्सर्गो गुणवैषम्यमात्मनः।**[117]

आद्यस्सर्गः महत् इति तत्त्वं भवति। अयं तु सृष्टेरादौ भगवतः प्रेरणया प्रकृतिस्थेषु सत्त्वादिगुणेषु स्थितस्य क्षोभस्य व्यत्यासेन उत्पादितः सर्गः।

**द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः।**[118]

द्वितीयः सर्गः अहङ्कारतत्त्वभूतः। अस्मिन् सर्गे पृथिव्यादिपञ्चभूतानाम् इन्द्रियाणाञ्च सृष्टिर्जायते।

**भूसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्।**[119]

तृतीयः सर्गः भूतसूक्ष्मात्मकः। अस्मिन् सर्गे पञ्चमहाभूतोत्पादकः यः सूक्ष्मरूपी वर्तते। तस्य तन्मात्रस्य सृष्टिरत्र जायते।

**चतुर्थ ऐन्द्रियस्सर्गो यस्तु ज्ञानक्रियात्मकः।**[120]

ज्ञानकर्मसाधकानाम् इन्द्रियाणां सर्जनम् अत्र द्रष्टव्यम्।

**वैकारिको देवसर्गः पञ्चमो यन्मयं मनः।**[121]

अस्मिन् पञ्चमे सर्गे सात्त्विकाहङ्कारात् इन्द्रियाणाम् अधिदेवतानामुत्सर्जनं भवति। मनो नाम अन्तरिन्द्रियोऽपि अस्मिन्नेव अन्तर्भवति।

**षष्ठस्तु तमसस्सर्गो वस्त्वबुद्धिकृतः प्रभो।**
**षडिमे प्राकृताः सर्गा वैकृतानपि मे श्रुणु॥**[122]

पञ्चपर्वाविद्ययोश्च उल्लेखः अस्मिन् सर्गे द्रष्टुं शक्यते। अत्र तामिस्रः, अन्धतामिस्रः, तमः, ब्रह्म, महामोहश्चेति पञ्चग्रन्थयः उत्पद्यन्ते। एताः ग्रन्थयः प्राणिनामज्ञानकारकाः। एते षट्सर्गाः प्राकृतसर्गेऽन्तर्भवन्ति।

**सप्तमो मुख्यसर्गस्तु षड्विधस्तुस्थुषां च यः।**[123]

[116] भागवतम् १२.७.११
[117] भागवतम् ३.१०.१४
[118] भागवतम् ३.१०.१५
[119] भागवतम् ३.१०.१५
[120] भागवतम् ३.१०.१६
[121] भागवतम् ३.१०.१६
[122] भागवतम् ३.१०.१७
[123] भागवतम् ३.१०.१८

उद्भिजादि षड्विधस्थावरसृष्टिमधिकृत्य अयं सप्तमः सर्गः प्रवर्तते। स च वनस्पतिः (ये पुष्पं विना फलन्ति ते), ओषधयः (फलपाकान्ताः), लताः (आरोहणापेक्षाः), त्वक्सारम् (वेण्वादयः), वीरुधः (रोहणानपेक्षाः), द्रुमाः (ये पुष्पैः फलन्ति ते द्रुमाः) चेति। अत्र चैतन्यः अव्यक्तरूपेण भवति। इमं केवलस्पर्शज्ञानेनैव ज्ञातुं शक्यते। अयमेव अत्र विशेषगुणः।

**तिरश्चाष्टमस्सर्गः सोऽष्टाविंशविधो मतः।**

**अविदो भूरितमसो घ्राणज्ञाह्यवेदिनः।।**

**गौरजो महिषः कृष्णस्सूकरो गवयो रुरुः।**

**द्विशफाः पशवश्चैत अविरुष्ट्रश्च सत्तम।।**

**खरोऽश्वोऽश्वतरो गौरश्शरभश्चमरी तथा।**

**एते चैकशफाः क्षत्तः श्रुणु पञ्चनखान् पशून्।।**

**श्वा सृगालो वृको व्याघ्रो मार्जारश्शशशल्यकाः।**

**सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः।।**

**कङ्कगृध्रबकश्येनभासबल्लूकबर्हिणः।**

**हंससारसचक्राह्वकाकोलूकादयः खगाः।।**[124]

अस्मिन् अष्टमे सर्गे पशु-पक्षि-कीटादितिर्यग्योनिप्राणिनां सर्जनज्ञानं लभते। अयं तु सर्गः उपर्युक्तरूपेण अष्टाविंशतिविधैर्विभक्तः।

तिरश्चां लक्षणम् - अविदः श्वस्तनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। घ्राणज्ञाः घ्राणेनैव इष्टमर्थं जानन्ति। ह्यवेदिनः दीर्घानुसन्धानशून्याः। अष्टमस्यास्य सर्गस्य अष्टाविंशतिभेदानां वर्णनं पुराणव्याख्यासु एवं दृश्यन्ते - गवादय उष्ट्रान्ताः द्विशफाः द्विखुराः नव। गवादयः चमर्यन्ता एकशफाः षट्। श्वादयो गोधान्ताः पञ्चनखा द्वादश। एवमेते भूचराः सप्तविंशतिः। मकरादयो जलचराः कङ्कादयश्च खगाः। अभूचरत्वेनकीकृत्य गृहीताः। एवं प्रकारेण अस्य सर्गस्य उपभेदाः गृहीता भवन्ति। अन्ये तिर्यक्प्राणिनः ये लोकेऽस्माकमज्ञानात् चरन्ति तेषामपि उक्तेष्वेतेषु यथायथमन्तर्भावो जायते।

**अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम्।**

**रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः।।**[125]

मनुष्यसृष्टेरुल्लेखः अस्मिन् नवमे सर्गे दृश्यते। मानवस्य आहारपद्धति उपरिष्टात् अधः जायते। अर्थात् मुखात् उदरं प्रति गच्छति इति। मनुष्याः कर्मपरायणाः रजोगुणप्रधानाः सुखमानिनश्च भवन्ति इति च अयं सर्गः बोधयति।

**वैकृतास्त्रय एवैते देवसर्गश्च सत्तम।।**[126]

एवं हि सप्तमः स्थावरसर्गः, अष्टमः पशुपक्ष्यादिसर्गः, नवमः मनुष्यसर्गः चैते उक्ताः सर्गाः वैकृतसर्गे अन्तर्भवन्ति।

**वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः।**[127]

124 भागवतम् ३.१०.२०-२४

125 भागवतम् ३.१०.२५

126 भागवतम् ३.१०.२६

127 भागवतम् ३.१०.२६





**दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः।**[128]

अयं तु दशमः सर्गः अतिरिक्तः सर्गः। अस्य कौमारसर्ग इति नामान्तरमपि वर्तते। अत्र सनक-सनन्दन-सनातन-सनत्कुमाराणां सृष्टिर्भवति। परन्तु सनक-सनन्दन-सनत्कुमार-सनत्सुजाताः इति केचन तेषाम् अभिप्रायं मण्डयन्ति।

प्राकृत-वैकृतसर्गोपेतोऽयं सर्गः विशेषेण उभयात्मकसर्ग इति पुराणानि पाठयन्ति। यथा -

**पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः।**

**प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः।।**[129]

**प्राकृतास्तु त्रयस्सर्गाः कृतास्तेऽबुद्धिपूर्वकाः।**

**बुद्धिपूर्वं प्रवर्तन्ते षट्सर्गा ब्रह्मणस्तु वै।।**[130]

उत्कथितान् दशभेदान् अतिरिच्य विहाय वा पुराणे नवभेदाः सन्ति इति केषुचन पुराणेषु उल्लिखितानि दृश्यन्ते। ते तु प्राकृतसर्गत्रयम्, पञ्चवैकृतसर्गाः, उभयात्मकसर्ग एक इत्याहत्य नवभेदाः। एतेषु प्राकृतसर्गः स्वभावतः अबुद्धिपूर्वकः। अर्थात् ब्रह्मणः बुद्धिव्यापारस्यावश्यकता प्राकृतसर्गे न विद्यत एवेति।

परन्तु वैकृतसर्गः उभयात्मकसर्गश्च प्राकृतसर्गात् विरुद्ध इति दृश्यते। किन्तु एतौ बुद्धिपूर्वकसर्गौ। अतोऽत्र ब्रह्मणा विचारपूर्वकं सृष्ट्यादिकार्यं कृतम् इति पुराणादिभिः स्पष्टमवगम्यते।

**प्राकृतसर्गस्य त्रयो भेदाः -**

१. **ब्राह्मसर्गः** - साङ्ख्यदर्शनानुसारेण महत्तत्त्वमेव प्रकृतिपुरुषसंयोगस्य प्रथमः परिणामः। भगवद्गीतानुसारेणापि ब्रह्मशब्दः बुद्धितत्त्वबोधक एव। अतः बुद्धिसर्ग एव ब्राह्मसर्ग इति स्पष्टं सर्वत्र।

२. **भूतसर्गः** - पञ्चतन्मात्राणां सृष्टिरेव भूतसर्गः। पञ्चतन्मात्राणि एव पृथिवीजलाग्निवाय्वाकाशानि इत्येषां पञ्चमहाभूतानां सूक्ष्मशरीराणि भवन्ति।

३. **वैकारिकसर्गः** - पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, उभयात्मकमनश्च आहत्य एकादशेन्द्रियसर्गोऽयं वैकारिकः। अस्य सर्गस्य ऐन्द्रियसृष्टिरिति नामान्तरमपि विद्यते।

**वैकृतसर्गस्य पञ्चभेदाः -**

१. **मुख्यसर्गः** - सृष्टिरचनाकाले ब्रह्मणा अविद्यारूपा तमोमया च सृष्टिरभूत्। तदनन्तरं बाह्याभ्यन्तरज्ञानशून्यानां जडात्मकानां स्थावराणां च सर्जनमभवत्। पृथिव्यां नित्यभूताः स्थावरा एव प्रमुखाः। अतोऽयं मुख्यसर्ग इति कथितुं शक्यते।

**मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः।**[131]

२. **तिर्यक्सर्गः** - मुख्यसर्गात् पुरुषार्थासाधकत्वम् आलोच्य ब्रह्मा पुनरालोक्य तिर्यग्योनेः सृष्टिं कृतवान्। अत्र पशुपक्ष्यादीनां सर्जनं जायते।

128 भागवतम् ३.१०.२८

129 विष्णुपुराणम् १.५.२५

130 वायुपुराणम् ६.६६

131 विष्णुपुराणम् १.५.२१

**३. देवसर्गः** - ब्रह्मा तिर्यग्योनिसर्जनादपि अतृप्तो भूत्वा स्वानन्दाय मोक्षहेतवे देवसर्गमकारि। एते ऊर्ध्वलोकवासिनः ब्रह्माभ्यन्तरज्ञानसम्पन्नाः सत्त्वगुणसहिताः भवन्ति।

**४. मानवसर्गः** - विषयसुखापेक्षिणः देवसर्गेणापि अतृप्तः ब्रह्मा पुरुषार्थसाधनाय विभिन्नप्राणिवर्गम् असृजत्। अयं प्राणिवर्गः पृथिव्यां वसति। अतोऽयं सर्गः अर्वाक्स्रोत इति नाम्ना पुराणेषु कथितः। अयं प्राणिवर्गः सत्त्वरजस्तमोभूयिष्टः। अयं प्राणी प्रथमतः तमोगुणस्य आधिक्यात् दुःखमनुभवति। रजोगुणाधिक्यहेतुना केवलविषयासक्तो भवति। अनन्तरं सत्त्वगुणस्याविर्भाविन बाह्याभ्यन्तरब्रह्मज्ञानमर्ज्य मोक्षं साधयति। इयमेव सृष्टिः मनुष्यसृष्टिरिति नाम्ना कथिता।

**५. अनुग्रहसर्गः** - प्रकृतेरनुग्रहात् सृष्टिरभवदित्ययम् अनुग्रहसर्गः। विष्णुपुराणानुसारमियं सृष्टिः उपरिकथितसर्गचतुष्टयमाहत्य ब्रह्मणा साङ्केतिकरूपेण सात्त्विकतामसगुणयुक्ता इति च प्रतिपादिता। वायुमार्कण्डेयपुराणयोः अनुग्रहसर्गः चतुर्धा विभक्तः। स च विपर्ययः, शक्तिः, सिद्धिः, तुष्टिः चेति। विपर्ययः स्थावरेऽन्तर्भवति। शक्तिः तिर्यग्योनिषु अन्तर्भवति। सिद्धिः मानवेषु अन्तर्भवति। तुष्टिस्तु सुरेषु (देवतासु देवेषु वा) अन्तर्भवति।

**पञ्चमोऽनुग्रहः सर्गश्चतुर्धा स व्यवस्थितः।**
**विपर्ययेन शक्त्या च तुष्ट्या सिद्ध्या तथैव च॥**[132]
**स्थावरेषु विपर्यासस्तिर्यग्योनिषु शक्तिता।**
**सिद्ध्यात्मनो मनुष्यास्तु तुष्टिर्देवेषु कृत्स्नशः॥**[133]

**उभयात्मकसर्गः -**

उभयात्मकसर्गस्य कौमारसर्ग इति च नामान्तरम्। अयं प्राकृतवैकृतात्मकोभयात्मकसर्गः। अत्र सनक-सनन्दन-सनातन-सनत्कुमाराणां सृष्टिः जायत इति केचन अभिप्रयन्ति। तथैव सनक-सनन्दन-सनत्कुमार-सनत्सुजातानां सृष्टिरियम् इति अन्ये केचन विबुधाः अभिप्रयन्ति। आदौ सृष्टाः सनकादयः यथाभूताः तथैव अद्यापि परिवर्तनारहिता एव भवन्ति इति कारणेन तेभ्यः चतुर्भ्यः वायुपुराणे कुमारा इति नामकरणं कृत्वा कौमारसर्गस्य औचित्यं सूचितं दृश्यते।

**यथोत्पन्नास्तथैवेह कुमार इति चोच्यते ।**[134]

कौमारसर्गस्य उभयात्मकत्वविषये भागवतटीकाकाराः अनेकान् अभिप्रायभेदान् सूचयित्वा तेषामेव विभिन्नमतानि च मण्डयन्ति। कुमाराणां सृष्टिः ध्यानाविष्टब्रह्मणः मनसा जात इति विश्वनाथचक्रवर्तिमतम्।

तथैव वल्लभाचार्यैः विरचितसुबोधिनीव्याख्यायां एते कुमाराः देवताः मनुष्याश्चेति परिगणय्य व्यासाचार्यैः कौमारसर्गः उभयात्मकसर्ग इति नामकृतमिति स्पष्टीकृतम्।

एवमेव कुमाराः मनुष्यकोटौ नान्तर्भवन्ति। एते ज्ञानभक्तिसम्प्रदायप्रवर्तकाः। ते पुराणोक्तरीत्या ब्रह्ममानसपुत्राः। तेषां जन्म एक एव, अतः चिरञ्जीवाः इति निम्बार्कानुयायिनः शुकदेवाचार्यस्य मतम्।

सृष्टिरचनायां भगवान् केवलः निमित्तमात्र एव। किन्तु पदार्थस्योत्पन्नाय शक्तिरेव प्रधाना। ईश्वरः केवलं तत्सृष्टेः रूपनिर्माता प्रतिनिधिः च। उदाहरणाय मेघसान्निध्यात् बीजाङ्कुरं भवति, परन्तु बीजः स्वशक्त्या स्वरूपं धरति।

[132] मार्कण्डेयपुराणम् ४८.२८
[133] वायुपुराणम् ६.६३
[134] वायुपुराणम् ९-१०९





तथैव ब्रह्मकृतायां सृष्टिक्रियायां ब्रह्मा मेघवत् सान्निध्यं वहति, उत्पन्नस्तु पदार्थः स्वशक्त्या स्वस्वरूपं धरति इति श्रीधरस्वामिना स्वस्य भागवतटीकायां स्वमतं मण्डितम्। एवं मतभेदेन सत्यां सत्यासत्यवादरूपेण कानिचनापि मतानि मण्डितानि भवन्ति तेषां मध्ये ब्रह्मणः सृष्टिकार्यमेव सत्यम्।

## सन्दर्भग्रन्थसूची

१. श्रीवेदव्यासः, बेट्टदपुर कृष्णप्प, **ब्रह्मवैवर्तपुराणम्**, श्री जयचामराजेन्द्र ओडेयर्, मैसूरु, १९५०.
२. श्रीवेदव्यासः, **भागवतपुराणम्**, गीता प्रेस्, गोरखपुर, १९९९.
३. श्रीवेदव्यासः, प. थानेशचन्द्र उप्रैति, **विष्णुपुराणम्**, परिमल पब्लिकेशन्, देहली, २०११.
४. श्रीवेदव्यासः, आर्. सेतुमाधवाचार्यः, **वायुपुराणम्**, श्री जयचामराजेन्द्र ओडेयर्, मैसूरु, १९४७.
५. श्रीवेदव्यासः, आस्थानविद्वान् पाटणकर चन्द्रशेखरभट्टः, **मार्कण्डेयपुराणम्**, श्री जयचामराजेन्द्र ओडेयर्, मैसूरु, १९५३.
६. दिह्गि वंशीकृष्णः, **पुराणलक्षणमीमांसा**, कणिवे प्रकाशन, मैसूरु, २०१८.

# साहित्यशास्त्रदिशा काशिकापठितोदाहरणानां पर्यालोचनम्

**डॉ. धर्मेन्द्रदास:**[135]

**प्रमुखशब्दा:**-काशिका, सूत्रम्, उदाहरणम्, अलङ्कार:, रस

**शोधसार:**-पाणिनीयसूत्राणां व्याख्यानावसरे कानिचन उदाहरणानि उपदेशपरकाणि सूक्तिरूपाणि च प्राप्यन्ते। तादृशाणां पद्यमयोदाहरणश्लोकानां विवेचनेन साहित्यिकतत्त्वं स्फुटीभवति । साहित्यशास्त्रीयाणां तत्त्वनिष्ठानाम् उदाहरणानां पर्यालोचनं विशेषतया क्रियते । काशिकावृत्तौ संगृहीतानां पद्यमयोदाहरणश्लोकानां विचार: प्रस्तूयते । साहित्यशास्त्राधारेण काशिकावृत्तिगतोदाहरणानां तात्पर्याकलनम् शोधपत्रेऽस्मिन् मुख्यविषयत्वेन प्रतिपाद्यते । काशिकावृत्तिगतोदाहरणेषु प्रतिफलितानां रीति-रस-गुण-अलङ्कारादीनां काव्यिकतत्त्वानां विचार: यथासम्भवं क्रियते। 'प्रथमो हि विद्वांसो वैयाकरण:' -इति आलङ्कारिकस्य आनन्दवर्धनस्य सिद्धान्त: शोधपत्रेण समर्थित: ।

**उपक्रम: (Introduction)**

भगवता पाणिनिना विरचितं सूत्रात्मकम् अष्टाध्यायीग्रन्थरत्नम् । पाणिनीयसूत्राणां व्याख्यानग्रन्थत्वेन प्रसिद्धा काशिकावृत्ति: । सहितस्य भाव: साहित्यम् । साहित्यस्याध्ययनं विना मनुष्य: पुच्छबिषाणहीन: पशुतुल्य: । महाभाष्यकारेण पठित: श्लोक: काशिकाकारेण उद्धृत:, यत्र श्लोके सूत्रकार: पाणिनि: कविरूपेण परिभाषित: । तद्यथा-

दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना ॥ (म.भा.१.४.५१)

काशिकाव्याख्याकारेण पदमञ्जरीकारेण कविशब्द: मेधाविमात्रवचन: इति व्याख्यात: । इत्थं सूत्रकार: पाणिनि: कविरूपेण विवेचित: । काशिकावृत्तौ संगृहीतानि उदाहरणानि च रमणीयानि। साहित्यशास्त्राधारेण काशिकावृत्तिगतोदाहरणानां तात्पर्याकलनम् शोधपत्रेऽस्मिन् मुख्यविषयत्वेन प्रतिपाद्यते।

**१.० काशिकावृत्ते: मङ्गलाचरणश्लोकविचार:**

मङ्गलं नाम प्रारिप्सितपरिसमाप्तिप्रतिबन्धकध्वंसासाधारणकारणम् । कार्यमात्रं प्रति सत्सु नैकेषु साधारणेषु कारणेषु मङ्गलं विलक्षणत्वं भजते। तद्विलक्षणत्वेन सर्वविधविघ्नध्वंसं प्रति असाधारणं कारणमुक्तम्। मङ्गलस्य कर्त्तव्यत्वे किं प्रमाणमिति जिज्ञासायां शिष्टाचारानुमितश्रुति: एव प्रमाणत्वाद् उच्यते-मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था: यथा स्यु: इति । प्रारिप्सितग्रन्थस्य निर्विघ्नसमाप्ति: मङ्गलस्य प्रमुखं प्रयोजनं भवति। अनुषङ्गत: शिष्यशिक्षायै व्यख्याकाराणां श्रोतृगणानां मङ्गलाय च मङ्गलाचरणं क्रियते। त्रिविधं मङ्गलाचरणं शास्त्रे स्वीक्रियते। नमस्कारात्मकम्, आशीर्वादात्मकं वस्तुनदिशात्मञ्चेति । अस्य काशिकावृत्तिनामकग्रन्थस्य प्रणेतारौ जयादित्यवामनौ । ताभ्यां विरचिता: मङ्गलाचरणश्लोका: वस्तुनिर्देशात्मकप्रकारा: सन्ति । ते च सन्ति त्रय: । वस्तुनिर्देशात्मकप्रकारे मङ्गलाचरणश्लोके ग्रन्थस्य

[135] Assistant Professor, Department of Sanskrit, Utkal University, Bhubaneswar-751004





प्रतिपादितविषय: प्रस्तूयते । वृत्ति-भाष्य-धातुपारायण-नामपारायणादिग्रन्थेषु विप्रकीर्णा: व्याकरणसिद्धान्ता: काशिकावृत्तौ साररूपेण संगृहीता: वर्त्तन्ते। काशिकावृत्तौ प्राचीनानां व्याकरणग्रन्थानां सिद्धान्ता: संगृहीता: संक्षेपेण चोपस्थापिता: इत्येवं प्रथमश्लोकस्यार्थ:। तत्र तन्त्रपदेन व्याकरणशास्त्रमभिप्रेतम्। द्वितीये तृतीये च श्लोके काशिकावृत्ते: गुणा: काशिकाकारेण प्रकीर्त्तिता: । तत्र इष्ट्युपसंख्यान-शुद्धगण-विवृतगूढसूत्रार्थ-व्युत्पन्नरूपसिद्धित्वं काशिकात्वमिति काशिकाकारेण वर्णितम्। इष्यतेऽनयेति इष्टि: । सूत्रेण असंगृहीतं कार्यं येन संगृह्यते तद् इष्टिपदेन उपसंख्यानपदेन वा उच्यते। काशिकायां संशोधितस्य गणपाठस्य सन्निवेश: वर्त्तते। अत: शुद्धगणा इति विशेषणं मङ्गलाचरणश्लोके प्रयुक्तम्। विवृतगूढसूत्रार्था इति विशेषणपदेन काशिका वृत्तिग्रन्थरूपेण परिचयं प्राप्नोति। सूत्राणां गूढाशय: येन ग्रन्थेन प्रतिपाद्यते स: ग्रन्थ: वृत्तिग्रन्थत्वेनाभिधीयते। व्युत्पन्नरूपसिद्धि: इति विशेषणपदेन काशिकावृत्ति: उदाहरणविभूषिता भवति । उदाहरणमण्डिता काशिकावृत्तिरिति परिचय: अस्मात् मङ्गलाचरणश्लोकादेव ध्वन्यते। पाणिनीयव्याकरणे सूत्रक्रम-प्रक्रियाक्रमभेदेन द्विविध: ग्रन्थ: समुपलभ्यते । पाणिनीयसूत्रक्रमम् अनुसरन् सूत्रार्थप्रतिपादक: ग्रन्थ: लक्षणैकचक्षुप्रकार: उच्यते । शब्दरूपसिद्धिसकाशाद् प्रक्रियानुसारं सूत्रक्रमम् अनुसरन् प्रक्रियाग्रन्थ: लक्ष्यैकचक्षुप्रकार: भवति। काशिकावृत्ति: यद्यपि लक्षणैकचक्षुप्रकार: ग्रन्थ:, तथापि व्युत्पन्नरूपसिद्धिरिति विशेषणपदेन लक्ष्यैकचक्षुप्रकारग्रन्थत्वेन अभिव्यज्यते । तत्र काशिकायां 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु', 'द्विर्वचनेऽचि' इत्येवं सूत्रद्वयमेव प्रमाणम्। अस्य सूत्रद्वयस्य व्याख्यानावसरे काशिकायाम् उदाहरणपदानां पदसिद्धिप्रक्रिया यथायथं प्रदर्शिता वर्त्तते। अन्तिममङ्गलाचरणश्लोके काशिकावृत्तिनामक: ग्रन्थ: व्याकरणस्य शरीरत्वेन काशिकाकारेण वर्ण्यते। पाणिनीयसूत्राणि यत्र व्याकरणस्य आत्मा, तत्र काशिकावृत्ति: व्याकरणस्य शरीरमस्ति। यथा शरीरं विना आत्मन: स्थिति: न सम्भवति, तथैव काशिकावृत्तिमतिरिच्य व्याकरणशास्त्रस्य कार्यं नैव पूर्णतां गच्छति। व्याकरणशास्त्रस्य शरीररूपा भवति काशिकावृत्ति: । महाभाष्यादिग्रन्थेषु व्याकरणस्य दार्शनिक: पक्ष: विवेचित: वर्त्तते। व्याकरणस्य सकलं कार्यं काशिकया सम्पन्नतां प्राप्नोति। एतादृश: मनोरम: अर्थ: मङ्गलाचरणश्लोकादेव अभिव्यज्यते।

**२.० काशिकागतोदाहरणेषु अलङ्कारतत्त्वम्**

काशिकायाम् 'अलंखल्वो: प्रतिषेधयो: प्राचां क्त्वा' इति सूत्रस्य व्याख्यानावसरे प्रत्युदाहरणरूपेण अलंकार: इति शब्द: उपलभ्यते। भूषणवचनोऽत्रालंशब्द:। अलङ्करणम् अलङ्कार: इत्येवं भावसाधनमिदं पदम्। साहित्यशास्त्रेऽपि हारादिवद् अलङ्कारा: भवन्तीत्युच्यते । शब्दार्थयो: उत्कर्षप्रतिपादका: काव्यरसोपकारकाश्च भवन्ति अनुप्रासोपमादय: अलङ्कारा:।

**२.१ उपमालङ्कार:**

अलङ्कारेषु उपमालङ्कार: प्राणभूत: भवति। अस्यालङ्कारस्य चत्वारि तत्त्वानि सर्वै: आलङ्कारिकै: स्वीक्रियन्ते। उपमेय:, उपमानम्, साधारणधर्म:, साधारणधर्मवाचकशब्दश्चेति चत्वारि तत्त्वानि उपमालङ्कारे प्रयुक्तानि भवन्ति । वाक्यस्य एकत्वे सति उपमानोपमेययो: वैधर्म्यारहितम् इवादिभिर्निपातै:, क्यङादिभि: प्रत्ययै: उपमितादिभि: समासैर्वा प्रतिपाद्यं सादृश्यकथनम् एव उपमालङ्कार: भवति। उपमाया: प्रयोग: उपमेयस्य उत्कर्षप्रतिपादनार्थं क्रियते। यदा कमले मुखस्य उपमा प्रदीयते, तदा मुखस्य उत्कर्षप्रतिपादनं भवति । उपमेयोपमानयो: साधर्म्यत्वेन उपमालङ्कारस्य

चमत्कारिता समुपजायते। काशिकायाम् 'उपमानानि सामान्यवचनैः' इति सूत्रस्य व्याख्यानावसरे उपमालङ्कारस्य उदाहरणानि प्राप्यन्ते। उपमीयतेऽनेनेत्युपमानम्। उपमातुं योग्यमुपमेयम्। उपमानोपमेययोः साधारणो धर्मः सामान्यम्। शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता, कुमुदश्येनी, हंसर्गदा, न्यग्रोधपरिमण्डला इत्येतानि उदाहरणानि उपमालङ्कारस्य काशिकागतानि। अत्र श्यामगुणविशिष्टत्वेन प्रसिद्धत्वादुपमानं शस्त्री, उपमेया देवदत्ता, तयोः साधारणो धर्मः श्यामत्वम्, तदभिधाय तद्विशिष्टायां श्यामाशब्दः पर्यवस्यतीति भवति सामान्यवचनः। उपमालङ्कारस्य भेदद्वयं साहित्यशास्त्रे स्वीक्रियते। पूर्णोपमा लुप्तोपमा चेति। पूर्णोपमा च द्विविधा। श्रौती आर्थी चेति। एतयोः वाक्यसमासतद्धितगतत्वेन प्रत्येकं त्रयः त्रयः भेदाः प्राप्यन्ते। व्याकरणशास्त्राधारेण श्रौती समासगा, समासगा अर्थी, तद्धितगा श्रौती, तद्धितगा आर्थी इत्येषाम् अलङ्काराणां काशिकागतानि उदाहरणानि प्रस्तूयन्तेऽत्र। श्रौती समासगा इत्यलंकारस्य काशिकागतमुदाहरणमस्ति वाससी इव। अत्र 'इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' इति वार्त्तिकेन 'वाससी' इत्यस्य 'इव' इत्यनेन समासः विभक्त्यलोपश्च भवति। प्रोक्तवार्त्तिकज्ञानं विना 'श्रौती समासगा' इत्यलङ्कारस्य ज्ञानं नैव सम्भवति। साहित्यशास्त्रे चानुरूपमुदाहरणं प्राप्यते। अत्र 'वाससी इव' इति काशिकोदाहरणे 'श्रौती समासगा' इत्यलङ्कारस्य मूलभूतं तत्त्वं सन्निहितं वर्त्तते। तुल्यार्थकः तुल्य-सदृशादिशब्दानां उपमानवाचिशब्देन सह समासः व्याकरणे स्वीक्रियते। पाणिनीयव्याकरणे 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति सूत्रेण एतादृशाः समासाः विधीयन्ते। साहित्यशास्त्रे समासगा आर्थी उपमा इत्यलङ्कारस्य उदाहरणानि एतादृशसमासनिष्ठानि प्राप्यन्ते। काशिकायां मातृसदृशः, पितृसमः इत्युदाहरणद्वयं प्राप्यते। अस्य समासस्य उदाहरणज्ञानं विना समासगा-अर्थी-उपमाप्रकारस्य अलङ्कारस्य सम्यक् ज्ञानं नैव सम्भवति। साहित्यशास्त्रे तद्धितगा -श्रौती- उपमाप्रकारस्योदाहरणानि वतिप्रत्ययान्तानि भवन्ति। काशिकायां वृत्तौ 'तत्र तस्येव' इति सूत्रस्य व्याख्यानावसरे तद्धितगा-श्रौती-उपमायाः उदाहरणानि निश्चेतुं शक्यन्ते। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः, पाटलिपुत्रवत् साकेते परिखा, देवदत्तस्येव देवदत्तवत् यज्ञदत्तस्य गावः, यज्ञदत्तस्येव देवदत्तस्य दन्ताः यज्ञदत्तवत् इत्येतानि काशिकागतानि उदाहरणानि प्रसङ्गेऽस्मिन् तात्पर्यग्राहकाणि। एतेषाम् उदाहरणानं सम्यक् ज्ञानं विना तद्धितगा-श्रौतीप्रकारस्य उपमालङ्कारस्य बोधनं नैव जायते। साहित्यशास्त्रे तद्धितगा-आर्थीप्रकारस्य उपमालङ्कारस्यापि उदाहरणानि वतिप्रत्ययान्तानि। काशिकायां 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रस्य व्याख्यानावसरे प्रदत्तानि उदाहरणानि तद्धितगा-आर्थीप्रकारस्य उपमालङ्कारस्य भवितुमर्हन्ति। ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत्, राजवत् इत्येतानि उदाहरणानि तत्रत्यानि प्रसङ्गेऽस्मिन् द्रष्टव्यानि। उपमालङ्कारस्य अपरः भेदः लुप्तोपमालङ्कारः। लुप्तोपमायाश्च अपरे त्रयः भेदाः सन्ति। धर्मलुप्ता, उपमानलुप्ता वादिलुप्ता चेति। यत्र उपमालङ्कारे साधारणधर्मः लुप्तः दृश्यते, सः धर्मलुप्तोपमालङ्कारः भवति। साहित्यशास्त्रे कल्पप्प्रत्ययान्तानि पदानि धर्मलुप्तप्रकारे उपमालङ्कारे व्यवहृतानि दृश्यन्ते। काशिकायाम् ईषदसमाप्तौ कल्पब्देश्यदेशीयरः इति सूत्रव्याख्यानावसरे धर्मलुप्तोपमाप्रकारस्योदाहरणानि प्राप्यन्ते। ईषदसमाप्तः पटुः पटुकल्पः, मृदुकल्पः इत्येतानि उदाहरणानि धर्मलुप्तोपमालङ्कारस्य उदाहरणानि भवितुमर्हन्ति। एतेषु साधारणधर्मस्य लुप्तः जायते। वादिलुप्तोपमालङ्कारस्य उदाहरणेषु वा-आदीनां लोपः जायते। साहित्यशास्त्रे क्यच्प्रत्ययान्तशब्दानां व्यवहारः वादिलुप्तोपमायां दृश्यते। काशिकायाम् उपमानादाचारे इति सूत्रव्याख्यानावसरे वादिलुप्तोपमालङ्कारस्योदाहरणानि प्राप्यन्ते। पुत्रमिवाचरति पुत्रीयति छात्रम्, प्रावारीयति कम्बलम्, प्रासादीयति कुड्ये, पर्यङ्कीयति मञ्चके इत्येतानि काशिकागतोदाहरणानि प्रसङ्गेऽस्मिन् तात्पर्यग्राहकाणि सन्ति।



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

२.२ उत्प्रेक्षालङ्कारः

उपमानोपमेययोर्मध्ये तादात्म्ये या सम्भावना क्रियते, तत्र उत्प्रेक्षालङ्कारः भवति। मन्ये, शङ्के, प्रायः, नूनम् इत्येतानि पदानि अलङ्कारेऽस्मिन् व्यवहृतानि दृश्यन्ते। उत्प्रेक्षा नाम सम्भावना। वर्णनीयस्य उपमेयस्य उपमानरूपेण सम्भावना क्रियते। उत्प्रेक्षणीयं सम्भावनीयं वस्तु जाति-गुण-क्रिया-द्रव्यभेदेन चतुर्विधं स्वीक्रियते। प्रकृतस्य उपमेयस्य अप्रकृतोपमानरूपेण सम्भावना यत्र भवति तत्र उत्प्रेक्षानामकः अलङ्कारः भवति। काशिकायां यथा-

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम्।
अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति॥

साहित्यशास्त्रे इवशब्दस्यापि प्रयोगः उत्प्रेक्षालङ्कारे प्राप्यते। काशिकायामपि 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रस्य व्याख्यानावसरे उत्प्रेक्षालङ्कारस्योदाहरणानि प्राप्यन्ते। मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम, दम्पतीव, जम्पतीव, रोदसीव इत्येतानि काशिकोदाहरणानि उत्प्रेक्षालङ्कारस्य भवितुमर्हन्ति। किञ्च काशिकायां 'स्वमज्ञातिधनाख्यायाम्' इति सूत्रस्य व्याख्यानावसरे पद्यमयोदाहरणश्लोकः प्राप्यते। यथा-

धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः।
उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ॥

उत्प्रेक्षालङ्कारस्य प्रयोगः श्लोकेऽस्मिन् दृश्यते। यद्यपि श्लोकोऽयं काशिकारेण उदाहररूपेण महाभारतात् संगृहीतः, तथापि काशिकाध्ययनवेलायां सहृदयानां व्याकरणविद्यार्थिनां कृते परमाह्लाददायकः वर्त्तते।

**२.३ स्वभावोक्तिरलङ्कृतिः**

साहित्यदर्पणानुसारं कथ्यते यत् – स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्। अर्थात् दुरूहयोः दुर्ज्ञेययोः पदार्थस्य क्रियारूपयोः चेष्टास्वरूपयोः वर्णनेन स्वभावोक्तिनामकः अलङ्कारः भवति। जाति-गुण-क्रिया-द्रव्यरूपाणां विविधावस्थासु प्रकटितानां पदार्थानां स्वरूपकथनमे स्वभावोक्तिनामकः अलङ्कारः। काशिकायां 'क्षुद्रजन्तवः' इति सूत्रस्य व्याख्यानावसरे क्षुद्रजन्तूनां स्वरूपकथनपरकः उदाहरणश्लोकः प्राप्यते। तद्यथा-

क्षुद्रजन्तुरनस्थिः स्यादथ वा क्षुद्र एव यः।
शतं वा प्रसृतौ येषां केचिदानकुलादपि॥

अत्र क्षुद्रजन्तुजातिमात्रस्य स्वभावकथनं काशिकाकारेणाभिप्रेतम्। अन्यत्र च 'नित्यमसिच् प्रजामेधयोः' इति सूत्रस्य व्याख्यानावसरे एकः उदाहरणश्लोकः दृष्टिपथमायाति। तद्यथा-

श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधसः।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी॥

अत्र काशिकाकारेण सूत्रार्थव्याख्यानेन साकं राज्ञः स्वाभाविकं बुद्धिवर्णनं विहितम्। अल्पमेधायुक्तस्य श्रोत्रियस्य बुद्धिरिव राज्ञः अनुवाकहता बुद्धिः तत्त्वार्थदर्शने न प्रभवति। इत्थं श्लोकेऽस्मिन् राज्ञः गुणमात्रस्य स्वरूपकथनहेतोः स्वभावोक्तिनामकः अलङ्कारः भवति।

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

२.४ विभावनालङ्कार:

विभाव्यते विचार्यते हेतुरस्यामिति विभावना। वि-पूर्वकात् णिजन्तभूधातो: बाहुलकादधिकरणे युच्प्रत्यये कृते विभावना इति पदं जायते । प्रसिद्धकारणं विना यदा कार्यस्य उत्पत्ति: जायते तदा विभावनानामक: अलङ्कार: भवति । काशिकाकारेण 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्यम्' इति सूत्रस्य व्याख्यानावसरे संगृहीत: उदाहरणश्लोक: विभावनालङ्कारस्य परिचायक:। तद्यथा-

> विना वातं विना वर्षं विद्युत्प्रपतनं विना।
> विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ॥

वृक्षस्य पतनमत्र प्रसिद्धकारणं विना जायते इत्येवं वर्णनं श्लोकेऽस्मिन् क्रियते। प्रसिद्धकारणं विना वृक्षपतनरूपस्य कार्यस्योत्पत्तिर्जायते इति कारणात् विभावनानामक: अलङ्कार:।

३.० काशिकागतोदाहरणेषु रसविवेचना

साहित्यशास्त्रे रससिद्धान्त: प्रसिद्ध: । रसं विना कस्यचिदपि शब्दार्थस्याभिव्यक्ति: नैव सम्भवति। व्याकरणशास्त्रे साहित्यशास्त्रानुमतानां रसाणां विवेचनं दुर्लभम् । तथापि पाणिनीयसूत्राणां व्याख्यानावसरे काशिकाकारेण संगृहीतोदाहरणेषु रसनिर्णय: क्रियते। काशिकायां 'रसादिभ्यश्च' इति सूत्रस्य व्याख्यानावसरे 'रसिको नट:' इत्युदाहरणं प्राप्यते । अत्र साहित्यशास्त्रीयरससिद्धान्तम् आधारीकृत्य काशिकाकारेण 'रसिको नट इत्यत्र भावयोग:' इत्येवं व्याख्यातम् । भावपदेन रतिहासादय: नाट्यधर्मा: सङ्गच्छन्ते । साहित्यशास्त्रे स्थायिभावत्वेन रतिहासादय: व्यपदिश्यन्ते । स्थायिभावप्रभव: एव रस: । काशिकायां वृत्तौ 'छन्दोगौक्थिकयाज्ञिकवह्वृचनटाञ्' इति सूत्रस्य व्याख्यानावसरे नटानां धर्म: आम्नायो वा नाट्यम् इति उदाहरणं प्राप्यते । काशिकागतं नाट्यमिति उदाहरणं भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य परिचायकमस्ति । रससिद्धान्तस्य प्रवर्त्तक: भरतमुनि: । रस: सामाजिकानाम् आस्वादरूप: भवतीति नाट्यशास्त्रे प्रतिपादित: । रस्यते आस्वाद्यते इति रस: । शोकस्थायिभावप्रभव: करुणरस: । 'कामप्रवेदनेऽकच्चिति' इति सूत्रस्य व्याख्यानावसरे काशिकायां प्रदत्त: करुणरसप्रधान: उदाहरणश्लोक: सहृदयानां व्याकरणपाठकानां चित्ताकर्षक: भवति। तद्यथा-

> कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता।
> माराविद: त्वां पृच्छामि कच्चिज्जीवति पार्वती ॥

माराविशब्दं ददातीति माराविद:। माराावि रवो माकारीत्यर्थ:। माराविद: कस्यचित् शुकविशेषस्य नाम। तं हस्ते निधाय कश्चिल्लालयति। लालनावसरे सस्नेहं कतिपयान् प्रश्नान् पृच्छति यत्, किं तव माता जीविता ? किं तव पिता जीवित: ? किं तव प्रियतमा जीविता ? चेति । अस्मिन् श्लोके कच्चित् इत्यस्य प्रयोगत्वात् धातो: लिङ् न भवति। 'कामप्रवेदनेऽकच्चिति' इति सूत्रे अकच्चिति इति पदस्य निर्देशात् श्लोके लिङ् न भवति । स्वाभिप्रायाविष्करणं कामप्रवेदनम् उच्यते। एतादृशस्य श्लोकस्य अवतारणेन व्याकरणमपि रसात्मकं भवति।

४.० काशिकागतोदाहरणेषु शब्दशक्तिविवेचना



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

साहित्यशास्त्रे प्रतिपादित: शब्दशक्तिविषयक: सिद्धान्त: व्याकरणशास्त्रेऽपि चर्चित: वर्त्तते। शब्दस्य शक्ति: शब्दशक्ति: यया शक्त्या एव शब्द: अभीष्टार्थं प्रकाशते। साहित्यदर्पणकारेण विश्वनाथकविराजेन शब्दशक्ति: त्रिधा विभज्यते। अभिधा लक्षणा व्यञ्जना चेति। शब्दस्य शक्ति: शब्दशक्ति:। पदपदार्थयो: सम्बन्धरूपा वाच्यवाचकभावापरपर्याया भवति शक्ति: । साहित्यशास्त्रे व्याकरणशास्त्रे च शक्त्या युक्तं शक्तं पदं शक्यश्चार्थ: स्वीक्रियते। काशिकायां शक्तिग्रह: इति उदाहरणं प्राप्यते। शक्ते: ग्रह: शक्तिग्रह:। बोधजनकता शक्तिरियं त्रिधा विभज्यते। शब्दशक्ते: विवेचनावसरे गङ्गायां घोष: इति प्रसिद्धं साहित्यशास्त्रीयम् उदाहरणं दृष्टिपथामायाति। अनुरूपमुदाहरणं काशिकायां साधकतमं करणम् इति सूत्रस्य व्याख्यानावसरे संगृहीतम्। गौणसारोपालक्षणाभेदस्य उदाहरणं गौर्वाहीक: इति प्रसिद्धम्। काशिकायां 'प्रकारे गुणवचनस्य' इति सूत्रस्य व्याख्यानावसरे प्रदत्तम् अग्निर्माणवक:, गौर्वाहीक: इत्येवम् उदाहरणद्वयं साहित्यशास्त्रीयमेव। 'गोत्रान्तेवासिमाणवब्रह्मणेषु क्षेपे' इति सूत्रस्य व्याख्यानावसरे कतिपयानि उदाहरणानि प्रदीयन्ते, येभ्य: उदाहरणपदेभ्य: निन्दार्थ: अभिव्यज्यते। ज«ावात्स्य:, भार्यासौश्रुत:, कुमारीदाक्षा:, कम्बलचारायणीया:, घृतरौढीया:, ओदनपाणिनीया:, भिक्षामाणव:, दासीब्रह्मण:, वृषलीब्रह्मण:, भयब्रह्मण: इत्येतानि उदाहरणपदानि क्षेपार्थकानि।

५.० उपदेशपरकाणि काशिकोदाहरणानि

काशिकायां सुभाषितश्लोका: उदाहरणश्लोकरूपेणापि समुपलभ्यन्ते। रसरहितानां पाणिनीयसूत्राणाम् अर्थबोधनावसरे शुष्कमनस्कानां मनुष्याणां कृते उपदेशात्मक-सुमधुरसूक्तिनाम् उपस्थापनं काशिकाकारस्य कवित्वं व्यनक्ति । कामक्रोधौ मनुष्याणां खादितारौ वृकाविव। मनुष्यस्य विनाशाय खलु कामक्रोधौ प्रभवत: । काशिकागतपद्यानि सहृदयपाठकानां कृते सततम् आह्लादजनकानि भवन्ति। व्यायाम: उत्तमस्वास्थ्यस्य कृते अपरिहार्य्य: भवति। व्यायामेन पुष्टं शरीरं सर्वदा रोगरहितं तिष्ठति। एतादृशोपदेशपरक: पद्यमयोदाहरणश्लोक: सूत्रव्याख्यानावसरे काशिकाकारेण संगृहीत:। तद्यथा-

> व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।
> व्याधयो नोपसर्पन्ति वैनतेयमिवोरगा: ॥

मानवमाणवशब्दयो: तात्पर्यबोधक: उदाहरणश्लोक: काशिकायां सूत्रव्याख्यानावसरे प्रदीयते । मनुशब्दात् अपत्यविवक्षायाम् अण्प्रत्यये कृते मानवशब्द: जायते। परन्तु स: मानव: वेदादीनाम् अध्ययनं परित्यज्य अज्ञानात् मूढबुद्ध्या कुत्सितमाचरणं करोति चेत् माणव: इत्युच्यते। प्राचीनकाले समाजे माणव: इति शब्द: निकृष्टब्रह्मणस्य कृते व्यवहृत: आसीत्। अत: माणवशब्द: निकृष्टार्थक: आसीत्। मनो: अपत्यं मानवशब्दस्तु उत्कृष्टार्थक: आसीदिति ज्ञायते । तदर्थमुच्यते यत्,

> अपत्ये कुत्सिते मूढे मनोरौत्सर्गिक: स्मृत:।
> नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणव: ॥

प्राकृतिक-दुर्विपाकविषये प्राग्लिङ्गज्ञानपरक: उदाहरणश्लोक: काशिकायां 'चतुर्थी सम्प्रदाने' इति सूत्रस्य व्याख्यानावसरे प्रदीयते। तद्यथा-

> वाताय कपिला विद्युदातपायातिलोहिनी।
> पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

आनन्द: वर्षशताद् अनन्तरमपि मनुष्यजीवने समागच्छति । अत एव कष्टकरात् तपश्चरणात् निवृत्त: तदर्थं प्रतीक्षमाणस्तिष्ठति मनुष्य: । काशिकायां रुजार्थानां भाववचनानामज्वरे: इति सूत्रस्य व्याख्यानावसरे काशिकारेण उपर्युक्तभावोपेत: पद्यमयोदाहरणश्लोक: प्रदत्त:। स यथा -

एति जीवन्तमानन्दो नरं वर्षशतादपि ।
जीव पुत्रक मामैवं तप: साहसमाचर ॥

‘सोऽचि लोपे चेत्पादपूरणम्’ इति सूत्रस्य व्याख्यानावसरे रामायणमहाभारतयो: विशिष्टानि चरित्राणि पद्यमयोदाहरणश्लोकेन उपदिष्टानि वर्त्तन्ते । तद्यथा-

सैष दाशरथी राम: सैष राजा युधिष्ठिर: ।
सैष कर्णो महात्यागी सैष भीमो महाबल: ॥

६.० प्रत्याहारनिर्माणकौशलपरकस्य श्लोकस्य काव्यत्वविमर्श:

काशिकायां प्रत्याहाराणां निर्माणकौशलम् एकेन श्लोकेन वर्णितम् । अष्टाध्यायिसूत्रेषु पठिता: एकचत्वारिंशत् प्रत्याहारा: श्लोकमाध्यमेन उदाहृता: ।

तद्यथा-

एकस्मान् ङञणवटा: द्वाभ्यां ष: त्रिभ्य एव कणमा: स्यु: ।
ज्ञेयो चयौ चतुर्भ्य: र: पञ्चभ्य: शलौ षड्भ्य: ॥

एकस्मात् अक्षरात् पर: ङञणवटा: स्यु: इति वाच्यार्थ: । ङञणवटै: एङ्, यञ्, अण्, छव्, अट् इति पञ्च प्रत्यहारा: भवन्तीति तात्पर्यार्थ: । द्वाभ्याम् अक्षराभ्यां पर: ष: स्यादिति वाच्यार्थ: । षकारेण झष् भष् चेति द्वौ प्रत्याहारौ भवत: इति तात्पर्यार्थ: । त्रिभ्य: अक्षरेभ्य: पर: कणमा: स्युरिति वाच्यार्थ: । कणमै: प्रत्येकं त्रय: त्रय: प्रत्याहारा: भवन्तीति तात्पर्यार्थ: । अक्, इक्, उक् चेति ककारेण त्रय: । अण्, इण्, यण् इति णकारेण त्रय: । अम्, यम्, ङम् चेति मकारेण त्रय: । साकल्येन कणमै: नव प्रत्याहारा: निर्मीयन्ते । चतुर्भ्य: अक्षरेभ्य: पर: चयौ ज्ञेयौ इति वाच्यार्थ: । चकारयकाराभ्यां प्रत्येकं चत्वार: चत्वार: प्रत्याहारा: भवन्तीति तात्पर्यार्थ: । अच्, इच्, एच्, ऐच् चेति चकारेण चत्वार: । यय्, मय्, झय्, खय् चेति यकारेण चत्वार: । साकल्येन चयाभ्याम् अष्टौ प्रत्याहारा: उत्पद्यन्ते । पञ्चभ्य: अक्षरेभ्य: पर: रेफ: प्राप्यते इति वाच्यार्थ: । रेफेण पञ्च प्रत्याहारा: इति तात्पर्यार्थ: । यर्, झर्, खर्, चर्, शर् चेति रेफेण पञ्च प्रत्याहारा: निष्पद्यन्ते । षड्भ्य: अक्षरेभ्य: पर: शलौ तिष्ठत: इति वाच्यार्थ:। शकारलकाराभ्यां प्रत्येकं षड् षड् प्रत्याहारा: प्रभवन्ति । अश्, हश्, वश्, झश्, जश्, बश् चेति शकारेण षड् प्रत्याहारा: । अल्, हल्, वल्, रल्, झल्, शल् चेति षड् । साकल्येन शकारलकाराभ्यां द्वादशसंख्यका: प्रत्याहारा: समुपजायन्ते । श्लोकेऽस्मिन् आर्याछन्दस: प्रयोग: वर्त्तते ।

७.० काशिकागतानि मनोरञ्जकोदाहरणानि





पाणिनीयसूत्राणां व्याखानावसरे काशिकायां संगृहीतानि नैवÀ◌ानि उदाहरणानि मनोरञ्जकानि । तात्कालिकसमाजे प्रचलिता: हास्योद्दीपका: शब्दा: सूत्रोदाहरणरूपेण स्वीकृता: । तादृशाणाम् उदाहरणानां पठनेन सानन्दं सूत्रार्थज्ञानं जायते । एवम्भूतानि कतिपयानि उदाहरणानि लालित्यपूर्णानि काव्यमहाकाव्यादिषु च प्रयुक्तानि दृश्यन्ते । एकस्मिन्नेव सूत्रे नकारादीनि एकादशसंख्यकानि उदाहरणानि काशिकायां सज्जितानि वर्त्तन्ते । नञ्समासे एतेषाम् उदाहरणानां गणना क्रियते ।

- नभ्राट् – न भ्रजत इति नभ्राट् (भ्रजते: क्विबन्तस्य नञ्समास:) । भ्रजृ दीप्तौ इत्यस्माद् धातो: भ्रजभ्रस- इत्यादिना क्विप्, जकारस्य व्रश्च- इत्यादिना षकार:, तस्य जश्त्वम्-डकार:, तस्यापि चर्त्वम्-टकार: ।
- नपात् –न पातीति नपात् (पाति: शत्रन्त: )। पदमञ्जरीकारेण पादिति क्विबन्तं स्वीक्रियते ।
- नवेदा: - न वेत्तीति नवेदा: (वेत्तिरसुन्प्रत्ययान्त: ) ।
- नासत्या: - सत्सु साधव: सत्या:, न सत्या असत्या:, न असत्या: नासत्या: ।
- नमुचि: - न मुञ्चतीति नमुचि:(मुचेरौणादिक: किप्रत्यय:) ।
- नकुल: - नास्य कुलमस्ति नकुल: ।
- नखम् – नास्य खमस्ति नखम् ।
- नपुंसकम् -न स्त्री न पुमान्नपुंसकम् (स्त्रीपुंसयो: पुंसकभावो निपात्यते) ।
- नक्षत्रम् – न क्षरते क्षीयते इति वा नक्षत्रम् । क्षिय:, क्षरतेर्वा क्षत्रमिति निपात्यते ।
- नक्रम् - न क्रामतीति नक्र: (क्रमेर्डप्रत्ययो निपातनात्) ।
- नाकम् – नास्मिन्नकमस्ति नाकम् । कम् (सुखम्), अकम्(दु:खम्), तद्यत्र नास्ति स नाक: स्वर्ग: ।

पदानां विशिष्टं न्यसनं समस्तपदानां प्रयोगे सम्भवति । पदविन्यासप्रसङ्गे सकारादीनि कतिपयानि काशिकोदाहरणानि तात्पर्यग्राहकाणि । व्याकरणे समासदशायां समानस्य स इत्ययमादेशो भवति। चरणे गम्यमाने ब्रह्मचारिण्युत्तरपदे समानस्य स इत्ययमादेशो भवति । सब्रह्मचारी इत्युदाहरणं द्रष्टव्यम् । समानो ब्रह्मचारी सब्रह्मचारी । ब्रह्म(वेद:), तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरतीति ब्रह्मचारी । तीर्थशब्दे उत्तरपदे यत्प्रत्ययपरे परत: समानस्य स इत्ययमादेशो भवति । सतीर्थ्य: इत्युदाहरणमत्र प्रदीयते । सतीर्थ्य: एकगुरुक: समानोपाध्याय: इति समानार्थकानि पदानि भवन्ति । समाने तीर्थे वासीति सतीर्थ्य: । तीर्थशब्देनेह गुरुरुच्यते । ‘अनेकमन्यपदार्थे’ इति सूत्रस्य व्याख्यानावसरे प्रस्तुतं श्लोकोदाहरणं मनोरञ्जकं भवति । तद्यथा-

सुसूक्ष्मजटाकेशेन सुगजाजिनवाससा ।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति ॥

महाभाष्ये अस्य श्लोकस्य केवलं पूर्वार्धं पठितम् । काशिकायां श्लोकस्य उत्तरार्धं सन्निवेशितम्। श्लोकपूरणार्थं तृतीयान्तपदानां निर्देश: वर्त्तते । सुष्ठु सुक्ष्मा जटा: केशा अस्येति चतुर्णां पदानां बहुव्रीहि: । अथवा सुष्ठु सूक्ष्म जटा येषु ते सुसूक्ष्मजटास्तादृशा: केशा: अस्येति पुनर्बहुव्रीहि: । एवं सुष्ठु गजाजिनं वास आच्छादनं यस्य तेन सुगजाजिनवाससा ।

बहुव्रीहिसमासस्य कतिपयानि मनोरञ्जकानि काशिकोदाहरणानि वर्तन्ते । 'तत्र तेनेदमिति सरूपे' इति सूत्रस्य व्याख्यानावसरे प्रदत्तानि केशाकेशि, कचाकचि, दण्डादण्डि, मुसलामुसलि इत्येतानि उदाहरणानि मनोरञ्जकानि।

- केशेषु केशेषु च गृहीत्वा इदं युद्धं प्रवृत्तम् –केशाकेशि
- कचेषु कचेषु च गृहीत्वा इदं युद्धं प्रवृत्तम्- कचाकचि
- दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तम् –दण्डादण्डि
- मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तम्- मुसलामुसलि

काव्यमहाकाव्यादिषु पदविन्यासस्य कृते उपयुज्यमानानि पदानि समस्तपदरूपेण उपलभ्यन्ते । नासिकाया: स्वरूपाधारेण उदाहरणकथनं हास्योद्दीपकम् । द्रुरिव नासिकाऽस्य द्रुणस: । गौ: इव नासिका अस्य गोनस: । उन्नता नासिकाऽस्य उन्नस: । विगता नासिकाऽस्य विग्र: । पादस्य आधारेण उदाहरणकथनं काशिकायां क्रियते । एण्या इव पादावस्य एणीपद: । अजस्येव पादावस्य अजपद: । प्रोष्ठस्य पादावस्य प्रोष्ठपाद: । इत्थम् अहल:, अहलि:, दुर्हल:, दुर्हलि:, सुहल:, सुहलि:, असक्थ:, असक्थि:, सुसक्थि: इत्येतानि काशिकागतानि उदाहरणानि मनोरञ्जकानि। 'अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच्' इति सूत्रस्य व्याख्यानावसरे पदत्तानि पटपटाकरोति, दमदमाकरोति, खरटखरटाकरोति, त्रपटत्रपटाकरोति इत्येतानि उदाहरणानि च हास्योद्दीपकानि । 'नगरात् कुत्सनप्रावीण्ययो:' इति सूत्रस्य व्याख्यानावसरे गद्यमयम् उदाहरणं चित्ताकर्षकं भवति । तद्यथा- केनायं मुषित: पन्था गात्रे पक्ष्मालिधूसर: । इह नगरे मनुष्येण, सम्भाव्यत एतन्नागरकेण । चौरा हि नागरका भवन्ति । केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत् । इह नगरे मनुष्येण, सम्भाव्यत एतन्नागरकेण । प्रवीणा हि नागरका भवन्ति। काशिकायां 'क्रीतात्करणपूर्वात्' इति सूत्रस्य व्याख्यानावसरे प्रदत्तं "सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी" इत्युदाहरणपद्यं मनोरञ्जकं भवति । किञ्च 'उपमानानि सामान्यवचनै:', 'तत्पुरुषे समासे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या:' चेति सूत्रयो: व्याख्यानावसरे प्रदत्तानि हंसगंदा, न्यग्रोधपरिमण्डला, दुर्वाकाण्डश्यामा इत्येतानि उदाहरणानि काव्यगतानि सन्ति। एतेषाम् उदाहरणानां सम्बन्धोऽधोलिखितेन भट्टिकाव्योद्धृतश्लोकेन सह स्थापयितुं शक्यते । तद्यथा-

योषिद्वृन्दारिका तस्य दयिता हंसगामिनी ।
दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥

एवं 'प्रकाशनस्थेयाख्ययोश्च' इति सूत्रस्य व्याख्यानावसरे प्रदत्तं 'संशय्य कार्णादिषु तिष्ठते य:' इत्युदाहरणं किरातार्जुनीयमहाकाव्ये दृश्यते । इत्थं नैकानि मनोरञ्जकानि काशिकोदाहरणानि सूत्रार्थबोधने रुचिं वर्धयन्ति ।

८.० प्राप्तसिद्धान्ता: **(Findings)**

१.रमणीयार्थप्रतिपादक: शब्द: काव्यं व्यपदिश्यते । काशिकावृत्तौ संगृहीतानि उदाहरणानि च रमणीयानि ।

२.पाणिनीयसूत्राणां व्याख्यानावसरे नैके उदाहरणश्लोका: सछन्द उपस्थापिता: । काशिकावृत्ते: मङ्गलाचरणश्लोका: ग्रन्थस्य वैशिष्टवर्णनपरका: ।

३. रसालङ्कारयो: दृष्ट्या कतिपयानां काशिकोदाहरणां माहात्म्यं वर्त्तते एव ।



[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-47-48 , **YEAR** 12, **VOL** -I, DOI-09-08-22

**Since 2010**

४. शब्दशक्ते: सिद्धान्ता: सूत्राणां व्याख्यानावसरे उदाहरणमाध्यमेन सम्यक् निर्दिष्टा: ।

५.काशिकायां वृत्तौ संगृहीता: कतिपया: उपदेशपरका: उदाहरणश्लोका: विद्यार्थिनां महोपकारका: भवन्ति ।

६. कतिपयानि रसात्मकानि उदाहरणानि च सूत्रार्थबोधने विद्यार्थिनाम् उत्साहं जनयन्ति ।

९.० उपसंहार: **(Conclusion)**

काशिकावृत्तौ पाणिनीयसूत्राणां विवेचनावसरेप्रदत्तोदाहरणानिसर्वशास्त्रोपकारकाणीति निर्णय: । उदाहरणान्येव पाणिनीयसूत्राणां क्रमश: प्रवृत्तिं बोधयन्ति । अत एवपाणिनीयव्याकरणे व्यावहारिकदृष्ट्याप्रवेश: काशिकोदाहरणद्वारैव साध्य:। किञ्चोदाहरणप्रत्युदाहरणै: सूत्रार्थबोधनस्येयं काशिकापद्धति: साम्प्रतिककाले संस्कृतव्याकरणशिक्षणे परमसहायिका भविष्यति । काशिकोदाहरणानां साहित्यिकं वैशिष्ट्यं बहुमुखिशोधक्षेत्रे मार्गं प्रस्तुवन्ति। संस्कृतं विहाय इतरभाषागवेषणाक्षेत्रे प्रवृत्तानां गवेषकानां कृतेऽपि काशिकाध्ययनं फलदायि भवति ।

## सन्दर्भग्रन्थसूची

1. Agrawala, V.S., *India as Known to Pāṇini*, University of Lucknow, Lucknow, 1953
2. Dash, RadhaMadhab, *Idioms in Kāśikā*, PratibhaPrakashan, Delhi, 1995
3. Grimal, F.(Ed), VenkatarajaSarma, V. (Ed.) Srivatsankacharya,V.(Ed.), Lakshminarasimham, S. (Ed.), *Pāṇinīyavyākaraṇodāharaṇakośaḥ*(Paninian Grammar through its Example), Vol.I , Vol.II&Vol.III(2), Rashtriya Sanskrit Vidyapeetha, Tirupati, 2007
4. *Kāśikā, Vāmanajayādityaviracitā, Jayaśaṁkaralāltripāṭhinā sudhākaramālaviyen ca sampāditā,* Tarā Book Agency, Vārāṇāsī, 1984
5. Kane, P.V. (Ed.) The *Sāhityadarpaṅa*( Paricchedas I,II,X *Arthālaṅkāras* with exhaustive notes), MotilalBanarasidass Publishers Private Limited,Delhi, Fifth Edition-1965, Sixth Edition-1974, 1995 (Reprint)
6. Kielhorn, F. (Ed.), Abhyankar, KashinathYasudev, *The VyākaraṇaMahābhāṣya of Patanjali,* Third Edition, Pune, 1972

# स्त्रीशक्तिभिः धर्मप्पोषणम्

कपिल: जानी[136]

**प्रमुखशब्दाः-** संस्कृत, नरः-नारी, प्रहेलिका, महाशक्तिस्वरुपा, महामायास्वरुपा, महाकालीस्वरुपा, महालक्ष्मीस्वरुपा, महासरस्वतिस्वरुपा, धर्मः, अधर्मः, धनः, पातिव्रत्यधर्मः, पारिवारिकसभ्यतानुकूलं, सिद्धिसंपन्नता, उच्चवैचारिकसंपदा, दैवियमनोभाव, नित्यधर्मः, नैमित्तिक्धर्मः, सामान्य धर्मः , विशेष धर्मः, काम्य धर्मः, आपद्धर्मः इत्यादि।

शोधसारः -संस्कृत विना न संस्कृतिः एवं संस्कृतम् विना न भारतः इति। संस्कृतः देवभाषा वेदभाषा ऋषिमुनीनां-ज्ञानीध्यानीनाञ्चेयं भाषा वर्तते। संस्कृतः ज्ञानविज्ञानयोरपि भाषा इति वयं जानीमः। भारतः धर्मप्राणः देशोस्ति। धर्मप्राणदेशे धर्मस्य पालनं ही भारतस्य विशेषता वर्तते। अस्माकं भारतीयानां कृते धर्मस्यपालनं, धर्मस्य अनुमोदनम्, धर्मस्य धारणं च अत्यावश्यकं अनिवार्यं चेति। धर्मपालने गृहस्थानां, वानप्रस्थानां,सन्यासीनां,पुरुषाणां,स्त्रीणां प्रति भिन्न-भिन्न धर्मः भवति। तेषुं स्त्रीधर्माणां ज्ञातुं सर्वासु अनिवार्यम् च। सूर्ये तेजः, अग्नौ औष्ण्यम्, चन्द्रेषु शैत्यम्, अमृते अमृतत्वम्, पृथिव्यां क्षमा, सिंहे शौर्यम्, मानवेषु मानवता, सतीषु सतित्वम्, पितृषु वात्सल्यम्, पुत्रेषु मोहः, स्त्रिषु पातिव्रत्यम्, ब्राह्मणेषु ब्रह्मत्वम्, क्षत्रिये क्षात्रत्वम्, वैश्ये वैश्यत्वम्, ब्रह्मचारीषु ब्रह्मचर्यम, गृहस्थेषु गार्हस्थ्यम्, वानप्रस्थिषु त्यागः, संन्यासीषु वैराग्यम् सर्वेषु वस्तुषु प्राणीषु विभिन्नाः धर्मा निहिताः सन्ति। तदेव सार्वभौमिकः धर्मः आत्मधर्मश्च। धर्मेणैव आत्मा संरक्ष्यते। धर्मस्य वधः धर्मीणां कृतेऽश्रेयस्करः अस्ति।

**'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यस्थितौ।''**[137]

मनुष्यैः किं कर्तव्यं किं अकर्तव्यमेतत् शास्त्रं सूचयति।

**धारणाद्धर्ममित्याहुः धर्मोधारयते प्रजाः।**
**यस्याधारण संयुक्तं स धर्मः इति निश्चितः।।**[138]

धर्मः एव प्रजां धारयति। धर्तुं योग्यत्वात् धर्मः येन जीवस्याभ्युदयः संभवति, निःश्रेयसः, प्राप्ति भवति तद् धर्मः। यतोऽभ्युदयः निःश्रेयस सिद्धिः स धर्मः। कोशकारैः धर्मः पुण्यम्, न्यायम्, आचारः शब्दाः पर्यायत्वेन स्वीकृताः।

विश्वामित्रेण उक्तम्-आर्यगणः यं प्रशंसन्ति तदेव धर्मः तथा यं निन्दन्ति तदेवाधर्मः-

**यमार्याः क्रियमाणं तु शंसन्त्यागमवेदिनः।**
**स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षते।।**
**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।**[139]

[136] सहायक व्याख्याता, के. जे. इन्स्टीट्यूट ओफ़् आयुर्वेद एण्ड रिसर्च, सावली, वडोदरा
[137]. श्रीमद्भगवद्गीता. १६/२४
[138] . महाभारतम्.कर्णपर्वम्.६९/५८
[139] . मनुस्मृतिः.२/६





यज्ञः लोकोपकारश्च देवानां धर्मः, योगसिद्धिः सिद्धानां धर्मः नृत्यगीते गन्धर्वानां धर्मः, जपतपांसि ज्ञानध्यानानि ऋषिणां धर्मः, दानयज्ञदयाशौचाहिंसाभक्तयः मानवानां धर्मः पातिव्रत्यम्, वात्सल्यम्, स्नेहः लज्जा, दया, भक्तिः सतीत्वं स्त्रीणां धर्मः वर्तते। बुद्धिमान पुरूषः सर्वदा धर्माश्रयीभूतो भवेत्। अधर्मेण समाजस्य देशस्य शान्तिः हीयते। सनातनो धर्मः कल्याणप्रदायको वर्तते। अस्मिन्नेव विश्वशांति निहितम् अस्ति। धर्मवृद्धौ सत्यां प्राणीनां वृद्धिः सञ्जायते। धर्मक्षीणे प्राणीः क्षीणो भवति। तदर्थं धर्मस्य नाशं न कल्पयामः कदापि।

**धर्मे वर्धति वर्धन्ते सर्वभूतानि सर्वदा।**
**तस्मिन् ह्रसति हीयन्ते तस्माद्धर्मं न लोपयेत्।।** [140]

धर्मः अस्मान् बोधयति यत् धर्मस्य नाम्ना कुकृत्यं न करणीयम्। यः धर्मः अन्यद् धर्मं बाधते वा कलाहार्थं प्रेरयति सः अधर्मः -

**धर्मं यो बाधते धर्मो न स धर्मः कुधर्म तत्।**
**अविरोधात् तु यो धर्मः स धर्मः सत्यविक्रम।।**[141]

भारतीयसाहित्येषु स्त्रीणां कृते वामाङ्गी, दक्षिणाङ्गी पदेन आर्यैः पुरूषैरङ्गीकृतम्। वामाः स्त्रियः पत्युः सहचरी भूत्वा पथदर्शिका, कार्यसाधिका, मार्गदर्शिका तथा पत्युरनुपस्थितौ गृहस्य परिवारस्य संरक्षिका भवन्ति। दक्षिणाङ्गयः स्त्रियः पत्युः पन्थोपरि प्रचलन्ति तथा पातिव्रत्ययुक्ता, पत्युराज्ञापालनकर्त्री उतमलोक प्राप्तकर्त्री भवन्ति। स्त्रीषु सत्वरजः तमांसि गुणाः अवतिष्ठन्ति। स्त्रीषु अक्षय क्रियाशक्तिः ज्ञानशक्तिः ईच्छाशक्तिनां क्रियाज्ञानेच्छाशक्तीनां सञ्चरणं भवति। अत एव एतेषु तत्त्वेषु अवधानेषु स्त्रियाः देविस्वरूपा भवन्ति।

**स्त्रियःसमस्ता सकला जगत्सु** ||[142]

स्त्रीणाम् उत्पत्तिः हेतुः बृहदारण्यकोपनिषदि उक्तं यदा एकाकी पुरूषः संसारे भयम् अनुभूतवान् तदा तेनानन्दः न प्राप्तः। सः स्वस्मिन् त्रुटिः दृष्ट्वान् तदा स्त्री प्रादुर्भूता। संसारस्य पुरूषस्य पूर्णतार्थे स्त्रियः सञ्जाताः-

**स इममेवात्मानं द्वेधा पातयत्ततः पतिश्च पत्नी चाभवताम्।**
**तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः।।**[143]

शतपथब्राह्मणे उक्तम्-पुरूषः स्त्रीणाम् अर्धांशः वर्तते-

**अर्धो ह वा एष आत्मनो यज्जायेति।**[144]

व्याससहितायां लिखितम् अस्ति यत् यावत् पर्यन्तं स्त्रीप्राप्ति न भवति तावत्पर्यन्तं पुरूषः अपूर्ण एव -

[140]. महाभारतम्.शान्तिपर्वम्.९०/१७
[141]. महाभारतम्. वनपर्वम्.१३१/११
[142]. दुर्गासप्तशती:११/६
[143]. बृहदारण्यकोपनिषद्.१/४/३
[144]. शतपथब्राह्मण.५/२/२/१०

**यावन्न विन्दते जायां तावदर्धो भवेत् पुमान्॥**[145]

भारतीयसमाजे स्त्रीणां कृते सहधर्मचारिणी शब्दं प्रयुज्य सर्वोच्च स्थानं धर्मशास्त्रेण प्रदत्तः। शास्त्रीयविधाने पुरूषैः सह स्त्रीणां सम्बन्धः स्थापिते सति पत्नी इत्युच्यते। पत्नी पुरूषस्य अर्धांशः वर्तते। पत्नी साक्षात् लक्ष्मीस्वरूपा वर्तते। पुरूषैः सम्मानितं स्त्रियाः वैदिकं नाम 'मैना' वर्तते। एक तेज द्वे नाम' एकस्यैव तत्वस्य भागद्वयं वर्तते। तयोः नाम स्त्री पुरूषश्च वा नर-नारी इति-

**एकं ज्योतिरभूद् द्वेधा राधामाधवननामकम्।**[146]

एकं तत्वं बहुधा ईक्षन्ते। नरः शिवः, तर्हि नारी शिवा, नरः नारायणः तर्हि नारी नारायणी वर्तते। नरः यदि संतप्यते चेत स्त्रियः तं शीतलतां यच्छति। यदि नरः क्रोधः तर्हि नारी शान्तिः, यदि नरः भर्ता तर्हि नारी भार्या, यदि नरः गृहस्वामी तर्हि नारी गृहस्वामिनी, यदि नरः कर्ता तर्हि नारी क्रिया, यदि नरः भुक्तिः, तर्हि नारी मुक्तिः वर्तते। नरनार्यौ, स्त्रीपुरूषौ पतिपत्न्यौ एकस्यैव तेजपुञ्जस्य द्वे ज्योतिः वर्तते। स्त्रियं पुरूषाणां कृते सर्वदा प्रहेलिका स्वरूपाः वर्तन्ते। किन्त्वधुना पश्चिमप्रभावात् स्त्रियः स्वस्य कृते एव प्रहेलिका सञ्जाताः। स्त्रिय स्वगृहस्य लक्ष्म्यः सन्ति। सुतस्य माता, पत्युः संगिनी, देशस्थ सेविका, विश्वस्य शक्तिः वर्तते। स्त्री अनुरागमयी वर्तते। स्वजनेष्यनुरागी भूत्वा कस्यामपि परिस्थितौ स्थातुं शक्नोति। स्त्रियः स्वस्यानुरागस्य पुरूषस्योपरि अन्या यदि अनुरागं करोति चेदभीष्टं न भवन्ति। स्त्रियः **महाशक्तिस्वरूपाः** अपि वर्तन्ते। स्त्री प्रेरणया पुरूषः गौरवान्वितो भवति तथा अजेयः भवितुम इच्छति, सा **महादेवि** भवति। स्त्रियः **महामायास्वरूपा** अपि वर्तते। स्त्रीषु सम्मोहनं आकर्षणं स्वभावतः वर्तते। स्त्री उत्सर्गमयी वर्तते। स्त्रियः स्वजनान् कृते सर्व कृत्वापि तान् प्रति समर्पिता भवन्ति। स्त्रीणां आत्मनः स्वार्थः कदापि न भवति किन्तु परिवारस्य कृते एव भवति। यदा परिवारस्य उपरि काचित् समस्या पतति तदा **महाकाली** भूत्वा संरक्षिका भवति। बालकानाम् आरम्भिकशिक्षासु **महासरस्वती**स्वरूपा वर्तते। स्त्रीभिः प्रदत्ता शिक्षा अक्षय्य भूत्वा प्रशस्तमयी बुद्धिरूत्पादयति। यदा सा धनवस्त्रादीनां संरक्षण तथा संवर्धनं करोति तदा सैव **महालक्ष्मी**स्वरूपा वर्तते। मानवजीवनं स्त्रियं विना अपूर्णम् इव विभाति। स्त्रीणां जीवनं यदा न्याययोग्यः तदेव धर्म इति। यद्विपरितः अनाचारः तदेवाधर्मः।

**आरम्भोन्याययुक्तो यः स ही धर्म इति स्मृतः।**
**अनाचारस्त्वधर्मेति एतच्छिष्टानुशासनम्॥**[147]

वेदेषु प्रतिपादितं कर्तव्याकर्तव्यम् अपि धर्मस्य प्रथमं लक्षणं वर्तते। ये धर्मं विजानन्ति तेषां मते सत्यं सारल्यञ्च सर्वोत्तमधर्मः वर्तते। सहजता एव उत्तमावस्था वर्तते। यद्वेदेन प्रतिपादितं सत्येन च प्रतिष्ठितम्। भगवान शङ्करः पार्वतीं गृहस्थधर्मान् वदन कथयति-

**अहिंसा सत्यवचनं सर्वभूतानुकम्पनम्।**
**शमो दानं यथाशक्ति गार्हस्थो धर्म उत्तमः॥**[148]

145. व्यास स्मृतिः. २/४
146. निरुक्तम्.३/२१
147. महाभारतम्.वनपर्वम्, २०७/७७
148. महाभारतम्,अनुशासनपर्वम्,दानधर्मपर्वम्.१४१/२५





अहिंसा, सत्यं, सर्वभूतेषु अनुकम्पा, इन्द्रियाणां शमः, यथाशक्तिदानं, गृहस्थस्य उत्तम धर्माः वर्तन्ते। परपुरूषस्य वा परस्त्रीणां सेवनं न कर्तव्यम्, आचारस्य रक्षा, स्त्रीरक्षा, अपरिग्रहिता, मांसादिनां भक्षणं न कर्तव्यम् इति धर्मस्य पञ्चभेदाः सन्ति। भेदस्य नैकाः शाखाः वर्तन्ते। महाभारतस्य अनुशासनपर्वणि दानधर्मपर्वे पार्वती शिवं स्त्रीधर्मान् विषये जिज्ञासति तदा शिवः उक्तवान्। स्त्रियैः शक्तितः देवगुरूपितृयाचकानां सत्कारः करणीयः। वृद्धानाम् अभिवादनं, प्राणीनाम् अहिंसनम्, सत्यप्रतिज्ञं, शरणागतवत्सला,गौसेवा, आतिथ्यसत्कारम्, ब्रह्मचर्यपालनम्, परपुरूष वा परस्त्रीणां संसर्गः न कर्तव्यम् सदाचारैः क्षमाशीलैः धर्मपालनम् एते उत्तमधर्माः सन्ति। जीवने धर्मस्य धनस्य च बहुमहत्वं अस्ति। धनं गृहस्थीनां सहायकं । धनमेव धर्मस्य साधनम् अस्ति। धनेनैव सर्वम् प्रतिष्ठितम्। धनिनः एव लोके जीवन्ति। ये निर्धनाः नराः ते मृताः भवन्ति-

**धनमाहुः परं धर्मं धने सर्वं प्रतिष्ठितम्।**
**जीवन्ति धनिनो लोके मृता ये त्वधना नराः॥**[149]

धने केवलं सुखस्यांशः भवति। परं सुखं तु धर्मे एव वर्तते -

**धने सुख कला काचिद् धर्मे तु परमं सुखम्।**[150]

धनस्य अभिलाषा वर्तते सा स्त्री ता एव महालक्ष्मी इत्युच्यते। लक्ष्मीसम्पन्नाः स्त्रियः भवन्ति या उत्तमगुणसंयुक्ताः, देवब्राह्मणसेवायाम् उद्यता भवेयुः गौसेवायां तत्पराः एवं धान्यादि संग्रहिता स्त्रियः लक्ष्मीसम्पन्ना भवन्ति।

**वसामि स्त्रीषु कान्तासु देवद्विजपरासु च।**
**विशुद्धगृहभाण्डासु गोधान्याभिरतासु च॥**[151]

याः स्त्रियः सत्यमेव आचरयन्ति, दर्शनीयाः, श्रेयस्करवैचारिकाः, सौभाग्यगुणयुक्ताः, पातिव्रत्याः कल्याण्यः, आचारवत्यः वस्त्राभूषणविभूषिताः भवन्ति ताः साक्षात् लक्ष्म्याः सान्निध्यं प्राप्नोति -

**सत्यासु नित्यं प्रियदर्शनासु : सौभाग्ययुक्तासु गुणान्वितासु।**
**वसामिनारीषु पतिव्रतासु कल्याणशीलासु विभूषितासु॥**[152]

प्रत्यक्षेण लक्ष्मीः अत्र न विराजते। सशरीरं तु लक्ष्मीः नारायणेन सह विराजते। यत्र लक्ष्मीः शुभाः, यत्र लक्ष्म्याः निवासः तत्र धर्म एव यवति। यशोवृद्धि सञ्चायते,धनोपार्जनं भवति। इच्छा परिपूर्यते।

**नाहं शरीरेण वसामि देवि, नैव मया शक्यमिहाभिधातुम्।**
**भावेन यस्मिन् निवसामि पुंसिं, स वर्धते धर्मयशोऽर्थकामैः॥**[153]

धनस्य अपेक्षया धर्मः वास्तविकरीत्या आपत्तिः रहितं वर्तते। यदि मानवः लोभं, प्रमादंम्, आलस्यं त्यजति चेत् धर्मः एव ही श्रेष्ठ पदं वर्तते। पुरूषैः सर्वदा स्त्रीणां सम्मानं कृतम्। हिन्दु संस्कृतौ स्त्रियः पूज्याः वर्तन्ते -

**यत्र नार्यस्तु पूज्यन्ते रमन्ते देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**

149. महाभारतम्,उद्योगपर्वम्,भगवद्यानपर्वम्.७२/२३
150. महाभारतम्,शान्तिपर्वम्,मोक्षधर्मपर्वम्.२७१/५६
151. महाभारतम्,अनुशासनपर्वम्,दानधर्मपर्वम्.११/११
152. महाभारतम्,अनुशासनपर्वम्,दानधर्मपर्वम्.११/१४
153. महाभारतम्,अनुशासनपर्वम्,दानधर्मपर्वम्.११/२१

भारतीयसंस्कृतौ स्त्रीणां कृते शाब्दिकभावना न केवली प्रदर्शिता किन्तु गृहस्थजीवने प्रतिपदं सार्थक्यं च प्रदर्शितम्। धर्माशास्त्रं स्त्रीणां स्वातन्त्र्यं न अपहरति किन्तु संरक्षणार्थम् आदिशति। स्त्रीणाम् संरक्षणं पुरूषाणां कृते भारतुल्यं नास्ति। पुरूषस्य स्त्रीसंरक्षणं धर्मः कर्तव्यञ्च वर्तते। धर्मशास्त्रं स्त्रियं प्रति महत्वपूर्णं, यशस्करञ्च वर्तते। स्त्रीधर्मेषु **''पातिव्रत्यधर्मं''** सर्वश्रेष्ठः धर्मः वर्तते। एतद् पातिव्रत्यधर्म पालनस्य आधिदैविकः लाभः वर्तते। अणिमादयः अष्टौ सिद्धयः स्त्रियः अनायासेन पातिव्रत्यधर्मपालनेन प्राप्यते। महाभारते द्रौपदीकुन्तीगान्धारी सत्यवती शैव्याऽनसूयारून्धत्यः स्त्रियः पातिव्रत्यपालनेन त्रिकालदर्शितां सिद्धिसम्पन्नतां च प्राप्नुवन्ति स्म। अधुनापि पातिव्रत्याचरणेन असाधरणाः शक्तयः प्राप्तुं शक्नुवन्ति नात्र कोऽपि सन्देहः कारणमेषा तदेव भूमिः वर्तते। पातिव्रत्याचरणेन जीवनं सुखमयं, संतान युक्तं, पारिवारिकसभ्यतानुकूलं आधिभौतिकसुख सम्पन्नं भवति। पातिव्रत्येन मनःधर्ममयम्, उच्चवैचारिकसंपदा,दैवियमनोभाव वृद्धिः, आध्यात्मिकसुखानुभूत्यादयः प्राप्यते। स्त्री धर्मे एकस्याः स्त्रियाः षड्विधा धर्माः भवन्ति-

**१.नित्यधर्मः**- नित्यधर्माचरणेन पापं न भवति पुण्यमपि न। एषः धर्मः सहजावस्थां दैनिककार्यञ्च कृत्यञ्च प्रदर्शयति। प्रातः कालादारम्य निशाकालपर्यन्त धर्ममयं दिवसयापन नित्यः धर्मः अस्ति।

**२. नैमित्तिकधर्मः**- धर्मः जीवनेऽस्माक बहुवारं समायाति। विशेषकार्यार्थ विशेषकर्म स्योपादनं नैमित्तिक इत्युच्यते। यथा-व्रताः, विवाहः, यज्ञोपवीतम् इत्यादयः संस्काराः नैमित्तिकाः सन्ति। निमित्तस्य शक्त्य अधिक लाभं वाञ्छितुं क्रियमाणं कर्म नैमित्तिक इत्युच्यतो।

**३. सामान्यधर्मः**- सामान्यधर्मेषु सत्याहिंसापरिग्रहसंतोषेन्द्रियसंयमश्रद्धाशौचादीनां समावेशो भवति। सत्यं, दया, तपः शौच, तितिक्षा, ईक्षा, शमः, दमः, अहिंसा, ब्रह्मचर्यम्, त्यागः, स्वाध्यायः, अर्जवम्, सन्तोषः, समदृक्, सेवा, मौनम्, आत्मविमर्शनम्, भगवद् श्रवणम्, कीर्तनम्, स्मरणम्, भगवदात्मसमर्पणम् इत्यादि लक्षणानां धर्मानां पालनेने सर्वात्मा भगवान् तुष्यति।

**४. विशेषधर्मः**- स्त्रीणां पितरं प्रति, पुत्र प्रति, पतिं प्रति, स्वजनं प्रति, भृत्यं प्रति विभिन्नाः धर्माः सन्ति। स्त्रीणां परस्परं नैके सम्बन्धाः सन्ति तथा कर्तव्यं अपि भिन्नं वर्तते। स्थितिः, स्थानं, अवस्था, व्यक्तिश्च परिलक्ष्य विशेषधर्माः निर्धार्यन्ते।

**५.काम्यधर्मः**- कामनायाः पूर्त्यर्थं सामान्य धर्मात् किमपि वैशिष्ट्यातिवैशिष्ट्य युक्तं क्रियमाणं कर्म काम्यधर्मः इत्युच्यते। यथा-कस्यापि कार्यस्य सिद्ध्यर्थं व्रतं जपः तपः अनुष्ठानम् इत्यादयः काम्यकर्मात्मकं काम्यधर्माः सन्ति।

**६.आपद्धर्मः**- स्त्रियः सर्वदा सामान्यस्थितौ न भवति। रोगशोकदुःखादयश्च तासां जीवने समागच्छन्ति तदा प्राणात्मरक्षार्थं अविहितमपि कर्म यदि संपादनीयं भवति चेत् तद् आपद्धर्मः उच्यते। अर्थकाममोक्षाणां मूलं धर्मः वर्तते। धर्मात् अर्थश्च कामश्च जायते।

अर्थकाममोक्षाः यदि धर्मेण सिद्ध्यते चेत कथं धर्माचरणं न क्रियते? –

**ऊर्ध्वबाहुविरौम्येष न च कश्चिच्छृणोति मे।**



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22
Since 2010

**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।।**[154]

गृहे प्रतिदिनं जायमाना पूजा, जपः, शुभकर्मम्, यज्ञः, दानेत्यादिनां पोषकः स्त्रिय एव वर्तन्ते। अस्माकमाचारः परितः उपस्थितान् जनान् प्रेरयति प्रत्येकं व्यक्तिः यस्य कस्यापि आदर्शः भवति अतः धर्ममयाचरणेन प्रभाविताः जनारपि धर्माश्रितः भविष्यन्ति। सर्वेभ्यः स्त्रीभिः परिचारिका न भाव्यं अपितु गृहस्वामिनि, गृहसाम्राज्ञी, गृहलक्ष्मी वा भवितव्या तदानीम् एव धर्मस्य रक्षणं, पोषणं, संवर्धनं भविष्यते। तदा ही संस्कारवन्तः सुप्रजाः प्रजनिष्यन्ति ।

## सन्दर्भग्रन्थसूची


| Sl | First Name of Author | Last Name | Title | Editor/Commentator etc. | City | Publication | Year |
|---|---|---|---|---|---|---|---|
| 1. | महर्षि | वेदव्यासः | महाभारतम्(षट् खण्डानि) | रामनारायणदत्तशास्त्री | गोरखपुरम् | गीताप्रेसः गोरखपुरम् | संवत् २०७२ |
| 2. | महर्षि | वेदव्यासः | श्रीमद्भगवद्गीता | जयदयालगोयनका | गोरखपुरम् | गीताप्रेसः गोरखपुरम् | संवत् २०७० |
| 3. | कुल्लुक | भट्टः | मनुस्मृतिः | पण्डित रामेश्वरभटट | वाराणसी | चौखंभासंस्कृत प्रतिष्ठान | वर्ष २०१५ |
| 4. | महर्षि | मार्कण्डेयः | दुर्गासप्तशतीः | रामनारायणदत्तशास्त्री | गोरखपुरम् | गीताप्रेसः गोरखपुरम् | वर्ष २०१३ |
| 5. | आदि | शङ्कराचार्यः | बृहदारण्यकोपनिषद् | प्रो. राजाराम | लाहौर | बाम्बेमशीन प्रेस | संवत् १९७० |
| 6. | ऋषि | याज्ञवल्क्यः | शतपथब्राह्मणग्रन्थः | श्रीहरिस्वामि | वाराणसी | चौखंभासंस्कृत भवनम् | वर्ष२०१२ |
| 7. | महर्षि | वेदव्यासः | व्याससंहिता | प. श्यामसुन्दर त्रिपाठी | वाराणसी | चौखंभासंस्कृत भवनम् | वर्ष२००८ |
| 8. | महर्षि | यास्कमुनिः | निरुक्तम् | उमाशन्कर शर्मा | मुंबई | खेमराजश्रीकृष्ण दास | वर्ष.१९६६ |


[154]. महाभारतम्,स्वर्गारोहणपर्वम्.५/६२

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor] | Since 2010
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22

# महर्षि दयानन्द की शिक्षा पद्धति का व्यावहारिक पक्ष : एक दृष्टि

## (व्यवहारभानु के विशेष संदर्भ में )

अनामिका[155]

**प्रमुखशब्द**

**शोधसार-** आत्मावलोकन के लिए शिक्षा आज भी एक सशक्त माध्यम है। भारत की वर्तमान शिक्षा पद्धति का इतिहास वैदिक युग से ही प्रारम्भ होता है। यदि भारत का पुरातन साहित्य एवं संस्कृति एक संचित निधि है तो इस निधि को युवा वर्ग तक पहुंचाना अत्यंत आवश्यक है। दूरदर्शी दयानन्द की शिक्षा पद्धति का मुख्य उद्देश्य मानव मात्र की उन्नति था। उन्होंने वैदिक शिक्षा पद्धति को आधार बनाकर अपनी शिक्षण पद्धति प्रस्तुत की जिसमें जीवन के व्यावहारिक पक्षों पर विशेष बल दिया गया। नारी शिक्षा, निःशुल्क शिक्षा, सर्वसमान शिक्षा इत्यादि दयानन्द शिक्षा पद्धति के ऐसे महत्वपूर्ण सिद्धांत हैं जिन्हें दयानन्द ने सर्वप्रथम प्रतिपादित किया और इनका वर्तमान शिक्षा पद्धति में महत्वपूर्ण स्थान है। भारतीय वर्तमान शिक्षा पद्धति को आगामी पीढ़ी में मानवीय गुणों को विकसित करने के लिए विशेष प्रयास करने होंगे ताकि वे भविष्य की चुनौतियों के लिए सक्षम बन सकें। प्रस्तुत शोध पत्र में दयानन्द शिक्षा पद्धति में उल्लिखित जीवनोपयोगी व्यावहारिक विषयों की संक्षिप्त रूप से चर्चा की गई है।

(e) ***Śivasaṃhitā*** – The original writer of this text is still unknown but this text is addressed by *Lord Śiva* to his partner *Parvati*, that's why it is called *Śivasaṃhitā*. This text is consist of five chapters inspired by *Advaita Vedanta* philosophy and discusses the importance of yoga gurus in pupils' life and the power of *asanas*, mudras and *siddhis*. This text is one of the most comprehensive treatises on *Haṭha yoga*, apart from the other two major surviving classical texts i.e *Gheraṇḍasaṁhitā* and *Haṭha Yoga Pradīpikā.* There are many editions of this manuscript that can be found but one of the most known critical editions are from *Kaivalya Dham* Yoga Research Institute, published in 1999. Based on various resources scholars believed that this text was composed in and around Varanasi between 1300 CE to 1500 CE. *Śivasaṃhitā* is a yoga-related text and five chapters of it refer to *Tantra* also.

The first chapter stated that yoga is the highest path to achieving self-liberation or *Mokṣa*. The second chapter described how the outside observable world is equivalent to the internal form of *Nadis*, Fire, *Jiva*, and others. The third chapter is stated the various stages of yoga practice and the theory of *asanas* and the importance of yoga gurus. The fourth chapter is dedicated to mudras and how practising mudras can lead to *Siddhis*, which awaken the inner dormant energy or *Kundalini*. The fifth chapter is the largest, it described the *Chakras* and *Mantras* and self-liberation. The *Śivasaṃhitā* stated that a householder can get benefits from it by doing yoga every day. Total 84 *asanas* are mentioned in this text but only four *asanas* are described in detail.

(f) ***Khecarīvidyā*** – Approximately 14th century CE the *Khecarīvidyā* of *Adi Nath* was one of the early Tantric texts on Haṭha yoga composed. It is the most important source for yogic Seals or *Mudras*. This text is a dialogue between Lord *Śiva* and his partner *Parwati*. The text is based on *Khecari's* mantra in the Kaula tradition belong to Tantric Shaivism. It is consist of three sections, described on Khecari mudra and it praises the use of mudra. Another one of the edited sections added to suitable Haṭha yoga readership. In this yoga practice body stores *Amrita* to raise *Kundalini* via the six chakras. It is one of the most important yogic practices of Haṭha yoga.

(g) ***Amṛtasiddhi*** – *Amṛtasiddhi* is the earliest Buddhist text on Haṭha yoga and was written in Sanskrit and Tibetan languages around the 11th century CE. The text described the yogic body functions. The Bindu controlled the breath and mind identified with Sad *Śiva*, the moon. The text also described the use of *Mahamudra* to control body, speech, mind and prevent death. The text explained the idea of Sun, moon and fire inside the body. The moon is in the head, exuding Amrita and the Sun or fire is in the belly, depreciating *Amrita*, heading to death. Here the *Bindu* described two types, the male is *Bija* and the female is Rajas. The text also stated the yogic practices of *Mahamudra, Mahabandha and Mahavedha* to control the breath and rise the *Sushumna*.

(h) ***Goraksha Śataka*** – The *Goraksha Śataka* is a *Tantric* tradition *Haṭha* yogic text written in the 10th century CE. The text described six limbs namely *Asana, Pranasamrodha, Pratyāhāra, Dhāraṇā, Dhyāna and Samādhi*. It describes how



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

the gradual increase of *Prāṇāyāma* leads to *Samādhi*. It is the first *Haṭha* yogic text in *Tantra* tradition that teaches four mudras i.e. *Mula Bandha, Uddhiyana Bandha, Jalandhar Bandha and Shakti*. Out of three force breath to the *Sushumna* and the fourth one is used to energise *Kundalini*. The text stated that controlling the mind and breath in *Prāṇāyāma* can lead to *Mokṣa*. The text also described three Chakras, Brahma at the root of the *Sushumna* channel, *Vishnu* at the centre of the same and *Rudra* middle of the eyebrows.

(i) ***Śrītattvanidhi*** – The Śrītattvanidhi is written around the 19th century in Karnataka on 122 *Haṭha* yogic postures. The text first attributed authorship of the work to the Maharaja of Mysore, *Krishnaraja Wodeyar* iii. The Maharaja put interest on all the works available concerning the iconography and iconometry of the divine figure in south India. He asked to illustrate all illuminated manuscripts which he mentioned in *Śrītattvanidhi* together forms of *Śiva, Vishnu, Skanda, Ganesha* and other different goddesses. This work is divided into nine sections i.e. *Shakti, Vishnu, Śiva, Brahma, Graha, Vaishnava, Shaiva, Agama and Kautuka.* The texts sole purpose is to make the body firm enough for the *Ṣaṭkarma* practice.

(j) ***Yogasopana Purvacatuska*** – The *yogasopana Purvacatuska* is a Marathi language Haṭha yogic text written in 1905 CE by yogi *Narayana Ghamande*. It is the first printed book illustrated with the halftone plates and described 37 asanas including *Matsyendra* and *Sarvanga* asana. This text broke the *Haṭha* yogic rules of secrecy, which is not showing the subtle body, instead of it engraving the three-dimensional physical postures. So that’s why the text is one of the most important treatises in *Haṭha* yoga.[8]

***Conclusion*** – This paper outlined an investigation of the *Ṣaṭkarma* according to Haṭha yogic texts. Ṣaṭkarma or *ShatKriyā* cleanses our body and prepares for Haṭha yogic practice towards liberation or *Mokṣa*. Different types of Haṭha yogic texts elaborated various kinds of procedures and techniques of controlling body, mind and soul. Most of the original texts are not available nowadays and some of them are newly composed by a different author and also some texts are paraphrased in different languages, however, the actual content of these texts is unchanged or modified by some of the authors. Some of the original manuscripts were also lost in due course of time and it is impossible to trace those manuscripts at present. Considering all

the available resources the main six cleansing *Karmas* or *Kriyā* are – *Dhautī, Basti, Netī, Tratak, Naulī, and Kapālabhāti*. However, the two additional *Karmas* namely *Cakri* and *Gajakarani* also mentioned in *Haṭha Ratnāvalī* but the fact that those two *Kriyās* also greatly coincide with the other main six *Kriyās*. Regular practice of these *Kriyās* purify our body and maintain perfect sound health. It also increases the physical, psychological, emotional, spiritual and intellectual levels of the human being. This research paper is purely based on materials reviewed and different types of potentially helpful manuscripts.

***End Notes*** –


1. Gharote M, Parimal D. Hatharatnavali, A treatise on Hatha Yoga of Srinivasa yogi, Motilal Banarsidass;2003.
2. Muktibodhananda S, Saraswati SS. Haṭha Yoga Pradīpikā. Yoga Publication Trust: Mungeli; 2000.
3. Nagendra HR, Nagrathana R. Promotion of Positive Health. Bengalore: Swami Vivekananda Yoga Prakashana; 2001.
4. P.S. Swathi, B.R. Raghavendra, Saoji A.A, Health and Therapeutic benefits of Ṣaṭkarma, A narrative review of scientific studies, Journal of Ayurveda and Integrative medicine. 2021; 12(1):206
5. Saraswati SN. Gheraṇḍasaṁhitā : Commentary on the yoga teachings of Maharshi Gheranda, Munger: Yoga Publications Trust; 2012.
6. Yogeshwar G. Kunjara – The Yogic Stomach Wash. Ancient Sci Life ; 1992.
7. https://digital.nios.ac.in/shatkarma, DOI:15/11/2021.
8. https://wikipedia.org/wiki/shatkarma, DOI:19/11/2021.


**Bibliography**


1. Ajmer Singh et. Al., "Essential of physical education, Delhi Kalyani publication, 2004.
2. Chandrasekaran K. Sound health through yoga, Premkalyan Publications, Sedapatti, Madurai, 1999.
3. Cheriya Narayana Nambudari. Ashtanga Hridaya Samhita, Choukamba Krishnadas Academy, Varanasi, 2007.
4. Dipak BC. The effect of Anulom Vilom and Kapalbhati Prāṇāyāma on Positive attitude in School going children. Edubeam Multidiscip online Res, 2013; J.7: 1-8.
5. Gathore M.L. "Applied Yoga" S.M.Y.M. Kaivalyadhama Lonavala – 410403, 1990.




[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010


6. Iyenger B.K.S, Light on Yoga, London : Unwin paper backs, 1989.
7. KN Uduppa : Stress and its management by yoga, Motilal Banarasidas Publishers private limited, New Delhi ; 1996.
8. Lalvani Vimla, Yoga for Stress, Hamlyn Publishers, London, 1998.
9. Nagendra H.R. Yoga Practices for Anxiety and Depression, Swami Vivekananda Yoga Prakashana, Bangalore ; 2004.
10. Patra S. Physiological effect of Kriyās : cleansing techniques, International Journal of Yoga, Philos Psychol Parapsychol, 2017, 5:3.
11. Pradhan R. Sripatanjalayogadarshanam – original Sanskrta, Padaecheda and Transliteration, Kaivalyadhama, Lonavala, India, 2019.
12. Swami Maheshanandaji. Hatha Ratnavali, Kaivalyadhama S.M.Y.M. samiti, 2002.
13. Swami Muktibodhananda. Haṭha Yoga Pradīpikā, Published by Bihar School of Yoga, Third Edition, 1998.
14. Swami Niranjanananda Saraswati, Gheraṇḍasaṁhitā, Yoga Publication Trust, 2012.
15. Upadhyay Dhunqel K, Malhotra V, Sarkar D, Prajapati R Effect of alternate nostril breathing exercise on cardio respiratory functions:Nepal Med. Coll. J. 10(1): 25-27, 2008.
16. Vishwas Mandlik. Yog Shikshan Mala, Yog Parichay, 6th Edition, Yogchaitanya Publication, Nashik : 36-45, 2001.
17. Yadav R. K. & S. Das, Effect of Yogic practice on pulmonary functions in young females, Indian Journal of Physiology & Pharmacology 45(4) : 2001.
18. https://kdham.com, DOI : 08/11/2021
19. https://nios.ac.in/introductiontohathayoga, DOI : 15/11/2021.
20. https://wikipedia.org/wiki/hathayogatexts, DOI : 12/11/2021.

# शब्दशास्त्रवतां वृत्तिस्वरूपविचारः

**लोकेशकुमारः**[158]

**प्रमुखशब्दाः** शब्दः, अर्थः, अर्थज्ञानम्, वृत्तिः, शक्तिः, लक्षणा, व्यञ्जना, शाब्दबोधः।

**शोधसारः**तत्तद्भाषाविदैः प्रत्यहं तत्तद्भाषाणामनेके शब्दाः श्रुतिपथमानीयन्ते, किन्तु तथाविधा अपि ते सर्वे शब्दाः सर्वमर्थं न प्रत्याययन्ति। तेषु केचिदेव कांश्चिदेव कदाचिदेव। तद्यथा साधु श्रुतिविषयतां गतमपि गङ्गापदं प्रवाहमेवार्थं बोधयति, न तत्तीरे चरतो गवादीन्, नापि तत्तटरूहान् वृक्षादीन् वा। अतस्तत्र केनापि महता कारणेन भाव्यमेव। अन्विष्यमाणे कारणेऽन्वयव्यतिरेकाभ्यामयमेव हेतुरधिगतो भवति यद्यमर्थं यत्पदमवभासयति, तेनार्थेन साकं तस्य पदस्य कश्चन सम्बन्धोऽवश्यं स्यादेव। अन्यथा तमेवार्थं कथमवगमयति, अर्थान्तरमप्यवगमयेत्। लोके दृष्टचरमप्येतद् यच्चक्षुरादीनि प्रमाणानि सम्बद्धमेवार्थं घटपटादिकं प्रकाशयन्ति, नासम्बद्धम्। शब्दोऽपि अन्यतमत्प्रमाणमिति सम्बद्धमेवार्थम् अवभासयेत्। अत एव ते ते शब्दा घटादयस्तान् तान् कम्बुग्रीवादिमदर्थानिव प्रबोधयन्ति सम्बद्धत्वात्, असम्बद्धत्वात् पटादीन् नेति शब्दार्थयोः कश्चन सम्बन्धः कल्पनीय एव। अयमेव च सम्बन्धो वृत्तिपदेन शब्दव्यापारादिपदेन चोच्यत इत्यादिवृत्तिविचारः शाब्दिकसरण्या तत्तन्मतमुपन्यस्य सारतया शोधलेखेऽस्मिन्नातन्यते।

**"अर्थगत्यर्थः शब्दप्रयोगः। अर्थं सम्प्रत्याययिष्यामीति शब्दः प्रयुज्यते"**[159] इति भगवद्भाष्यकृद्भणित्या शब्दानां व्यावहारिकत्वमुपादेयित्वं च लोकेषु नितरां स्फुटी बोभूवीति। तन्त्रवार्तिककृता कुमारिलेनापि शब्दोपयोगित्विमदमेवाक्षिलक्ष्यीकृत्य प्रमाणयाञ्चक्रे :–

**"सर्वो हि शब्दोऽर्थप्रत्यायनार्थं प्रयुज्यते।"**[160] इति

स चायं शब्दो यद्यर्थबोधनसाधकत्वेनोपयुक्तः, तत्कथममुष्मात्प्रयुज्यमानादर्थज्ञानं सम्बोभवीति, कानि वास्य साधनभूतानि भवन्तीति विजिज्ञासा समुज्जृम्भते। भगवतात्र पाणिनिना **"प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्"**[161] इति प्रब्रुवता लोकव्यवहार एवार्थज्ञाने साधनत्वेन प्रमाण्यते। तथा ह्यस्य पाणिनीयसूत्रस्य व्याख्यानप्रसङ्गे काशिकाकृतो वचनम् – **"लोकत एवार्थगतेः। यश्च लोकतोऽर्थः सिद्धः किं तत्र यत्नेन"**[162] इति। भगवान् भाष्यकारश्च प्रकृतमाचार्याभिप्रायमिममेवमेवं निरूपयामास :-

**"यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते? लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः"**[163] इति।

इहान्ये नागेशादयस्तु वृत्तज्ञानमप्यर्थज्ञानस्य साधनत्वेन बहुतरं मन्वते। नहि वृत्तिज्ञानाद्विना शाब्दबोधः सम्भवतीति प्रतिष्ठापयता यथा नागेशेनेदमभ्यधायि :-

[158] शोधच्छात्रः, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातप्रदेशः

[159] न वेति विभाषा, पातञ्जलमहाभाष्यम्, 1.1.44

[160] मीमांसासूत्रम्, 1.3.8, तन्त्रवार्तिकम्

[161] पाणिनीयाष्टाध्यायी, 1.2.56

[162] काशिकावृत्तिः, 1.2.56

[163] पातञ्जलमहाभाष्यम्, पस्पशाह्निकम्





**"तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात्"**[164] इति।

शाब्दबोधाभिप्रायमुद्दिश्य अस्माच्छब्दायमर्थो बुध्यत इति ज्ञानं पुरस्तादेव सुतरामभीष्यते। इदमेव वृत्तिज्ञानं शक्तिज्ञानत्वेन वा शक्तिग्रहत्वेन वापि सम्बोध्यते बुधैः। शाब्दिकानां वृत्तिज्ञानमिदमेवोपलक्ष्यात्र किञ्चिद्यथाबोधं वितन्यते।

शब्दस्य प्रमाजनकत्वे सर्वैः शब्दैः सर्वेषां श्रोतॄणां श्रवणमात्रेण बोधः स्यादिति शाब्दबोधं प्रति वृत्तिप्रयोज्योपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वमभ्युपपद्यते। शब्दतत्त्वविदां शब्दस्य तस्मिन् सामर्थ्यरूपे व्यापारे वृत्तिशब्दस्य प्रयोगोऽभिमतः, येन विज्ञातेन तदर्था झटिति बुद्धिमारोहन्तीति। अयञ्च व्यापारः सम्बन्धत्वेन विगण्यते बुधैः। एवं हि शब्दार्थयोः शाब्दबोधौपयिकः सम्बन्धः, अर्थप्रतियोगिकः पदानुयोगिकः पदप्रतियोगिकोऽनुयोगिको वा सम्बन्धो वृत्तिरिति निगद्यते। तस्माद्वृत्तेर्लक्षणं वृत्तिपदव्यवहार्यत्वम्, अर्थपदोभयनिरूपितसम्बन्धत्वं वेति वेदितव्यम्। इयं वृत्तिस्त्रेधा परिगण्यते। यथा हि नागेशो व्याजहार -

**"सा च वृत्तिस्त्रिधा, शक्तिर्लक्षणा व्यञ्जना च"**[165] इति

यद्यपि लक्षणाव्यञ्जने वैयाकरणैर्न स्वी क्रियेते। तथापि लक्षणाव्यञ्जनाविषयको व्यवहारस्तेषामप्रसिद्धशक्तिपदपर्यायभ्रान्त्या तत्र तत्र भवतीति तदनुसृत्य वृत्तिभेदत्वेनात्र लक्षणाव्यञ्जने समुपादीयेत एव।

**1. शक्तिविचारः -**

तत्र शक्तिस्तावन्न ईश्वरेच्छारूपा, इच्छारूपा वा, व्यवहारात्तस्या ज्ञानस्यासम्भवात्। तथाहि वृत्तिज्ञानं व्यवहाराज्जायते, यथा सर्गादौ प्रयोजकवृद्धेन 'घटमानय' इत्युक्ते घटमानयन्तं प्रयोज्यवृद्धं पश्यता बालेनानुमीयते 'अयं प्रयोज्यवृद्धः' 'घटानयनं मत्कार्यम्' इति ज्ञानवान्, घटानयनविषयकचेष्टावत्त्वात्, ततः 'प्रयोज्यवृद्धज्ञानम्' 'घटमानय' इति वाक्यजन्यम्, तद्वाक्यश्रवणाव्यवहितोत्तरमेव तत्प्रवृत्तेः' इत्यनुमानेन ज्ञानजनकत्वं वाक्ये विनिश्चीयते। तत आवापोद्वापाभ्यामन्वयव्यतिरेकेण पदादिष्वपि पदार्थविषयकबोधजनकत्वं निर्धार्यते। तच्च पदे वाक्ये वा बोधजनकत्वं बोधकारणीभूतपदवाक्ययोरर्थेन सह सम्बन्धाभावे नोपपद्यते, विषयेण सह सम्बद्धानामेव प्रमाणानां चक्षुरादीनां ज्ञानोत्पादकत्वदर्शनात्। नहि घटेन सह सम्बन्धं विनैव चक्षुरादि ज्ञानं जनयति।

एवञ्च कारणत्वान्यथानुपपत्त्या कल्प्यमानः शक्तिरूपः कारणसम्बन्धो ज्ञानरूपकार्योत्पत्तेः प्रागेवापेक्ष्यते। तदानीं नैयायिकाभिमतस्य ईश्वरेच्छारूपस्य इच्छारूपस्य वा सम्बन्धस्यासिद्धत्वेन ज्ञाताया एव शक्तेर्बोधकत्वेन शक्तिग्रहासम्भवः स्यात्। इदमत्राभिप्रेतम् - शाब्दबोधात् प्राक्तत्कारणीभूतं शक्तिज्ञानमपेक्षितम्। बोधजननात् प्राक् 'बोधजनकत्वाभाववदिदं पदम्' इति निश्चयसत्त्वेन तद्वत्ताज्ञानं प्रति तद्भाववत्तानिश्चयस्य प्रतिबन्धकत्वे इदं पदमेतदर्थविषयकबोधजनकतावत् इत्यादिस्वरूपस्य बोधजनकत्वघटितेच्छात्मकस्य शक्तिपदार्थस्य ज्ञानमसम्भाव्यमेवेति तत्त्वम्। किञ्च ईश्वरेच्छाया ईश्वरज्ञानस्य वा शक्तित्वमित्यत्रैकतरपक्षपातियुक्तेरभावात्

[164] वैयाकरणसिद्धान्तलघुमञ्जूषा, वृत्त्यर्थविचारः

[165] तत्रैव

उभयस्वीकारे तार्किका गौरवपराहता भवेयु:। जानाति, इच्छति, ततो यतते इति क्रमदर्शने तु प्रत्युत ज्ञानस्य शक्तित्वे प्राथम्यमेव विनिगमकम्।

अथ च 'दण्डाद्घटो जायताम्" इत्यादीच्छाविषयत्वमेव दण्डादौ घटादिकारणत्वं स्यात्। तथा चेच्छातिरिक्तलोकप्रसिद्धस्य कारणत्वरूपधर्मस्य विलय: स्यात्। यदि तु दण्डादौ स्वरूपसती शक्ति: कार्योत्पादिका, शब्दनिष्ठा तु ज्ञातैवेति वैलक्षण्यदर्शनात् तत्रातिरिक्तशक्तिस्वीकारे न किञ्चिद्बाधकमित्युच्यते, तदा तु यथा प्रत्यक्षस्थले संयोगसमवायादिसन्निकर्षणघटादिना सम्बद्धानामेव चक्षुरादीनां प्रत्यक्षप्रमाजनकत्वं न तु जनकत्वघटितेच्छारूपसम्बन्धेन वा, तथा शब्दस्यापि प्रमाणत्वेन तदतिरिक्तसम्बन्धेनार्थेन सह सम्बद्धस्यैव शाब्दज्ञानजनकत्वमुचितम्। अन्यथा 'पर्वतो वह्निमान् धूमात्' इत्याद्यनुमितिस्थलेऽपि हेतुसाध्ययो: 'धूमज्ञानजन्यज्ञानविषयो वह्निर्भवतु' इतीच्छाविषयत्वेन वह्निविषयकबोधजनकत्वरूपेण वा सम्बन्धेन निर्वाहे हेतुसाध्ययोर्नैयायिकाभिमतव्याप्तिरूपसम्बन्धोच्छेदापत्ति:।[166]

तस्मात् पदपदार्थयोर्बोधजनकत्वं तद्घटितेच्छादिरूपश्च सम्बन्धो नोचित:। किन्तु वाच्यवाचकपदव्यवहार्यं निरुक्तेच्छादिभिन्नं पदपदार्थयो: सम्बन्धान्तरमेव शक्ति:। तत्र वाचकत्वं वाच्यत्वं च न क्रमेण बोधजनकत्वरूपं बोधविषयरूपञ्च, किन्त्वखण्डोपाधिरूपं पदार्थान्तरम्।[167] अन्यथा पूर्वोक्तदोषापत्ति: नोपशममियात्। स च वाच्यवाचकभाव: शब्दार्थोभयनिष्ठ एव। तथाविधशक्तिज्ञापकम् 'योऽयं शब्द: सोऽर्थ:, योऽर्थ: स शब्द:' इत्याकारकमितरेतराध्यासमूलं तादात्म्यम्।[168] तदेव संकेत:। तस्यापि पदवृत्तिशक्तिज्ञापकत्वाच्छक्तिरिति व्यवहार:। पाणिन्यादिस्मार्तसंकेतस्यैव वाचकतानियामकत्वं न त्वाधुनिकस्य।

प्राचीनवैयाकरणास्तु बोधजनकतां शक्तिमाहु:। यथा च निगदितं भूषणसारे :-

**"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थै: शब्दानां सम्बन्धो योग्यता तथा॥"**[169]

इन्द्रियाणां चक्षुरादीनाम्, स्वविषयेषु चाक्षुषेषु घटादिषु, यथा अनादिर्योग्यता तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थै: सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थ: इति। इयञ्च योग्यतारूपा शक्ति: पदार्थान्तरम् इति।

आलङ्कारिकास्तु संकेतसहकारिणी शक्ति:। संकेतस्तु शब्दार्थयो: प्रतिपाद्यप्रतिपादकलक्षण: सम्बन्ध:, 'अस्माच्छब्दादयमर्थो बोद्धव्य:' इति प्रवर्तकोपदेशो वा। स च शब्दे स्थितो ज्ञात: सन् अर्थं विषयी करोति। अयं संकेतोऽर्थस्थितं पुरुषाज्ञानमुत्सार्य ज्ञातृत्वं जनयति। तत्र शब्दवत्तत्र गता क्रियापि करणम्, प्रदीपस्य कारणत्वे सति तत्प्रभावत्। सैव शक्तिरित्याचक्षते।

**2. लक्षणाविचार: -**

शाब्दिका लक्षणां लक्षणशब्देन न मन्यन्ते, लक्षणाङ्गीकारे वृत्तिद्वयमवच्छेदकद्वयञ्च कल्पनीयं भवति। शाब्दबोधे लक्षणाजन्योपस्थिते: पृथक्कारणत्वं वक्तव्यम्। एवं पदार्थोपस्थितावपि तज्ज्ञानस्य हेतुत्वं स्वीकार्यम्।

[166] तत्रैव
[167] तत्रैव
[168] तत्रैव
[169] वैयाकरणभूषणसार:, शक्तिनिर्णय:, कारिका 37





परस्परजन्यबोधे परस्पराभावमादाय व्यभिचारवारणाय अव्यवहितोत्तरत्वनिवेशे महद् गौरवम्। अतो गङ्गापदात् तीरप्रत्ययार्थं गङ्गापद एव शक्तिद्वयं स्वीकार्यम्। एका प्रसिद्धा, अपरा अप्रसिद्धा। भगीरथरथखातावच्छिन्नपय:प्रवाहनिरूपिता प्रथमा शक्ति:; सामीप्यसम्बन्धावच्छिन्न-तीरत्वावच्छिन्नविषयकत्वावच्छिन्नार्थनिरूपिता शक्तिद्वितीया। एवञ्च लक्षणया प्रतिपिपादयिषितस्यार्थस्याप्रसिद्धशक्त्यैव बोधनिर्वाहे कोऽभिनिवेशो लक्षणायां प्रेक्षावताम्।

**3. व्यञ्जनाविचार: -**

शाब्दिका व्यञ्जनामप्येकां तृतीयां वृत्तिमभ्युपपद्यन्ते। तथा चोक्तं नागेशेन -

**"मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थ-विषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्ध: संस्कारविशेषो व्यञ्जना** इति। अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता। द्योतकत्वं च **'क्वचित् समभिव्याहतपदीयशक्तिव्यञ्जकत्वम्'** इति वैयाकरणानामपि तत्स्वीकार आवश्यक:। एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात्। वक्त्रादिवैशिष्ट्यादिज्ञानं व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तर:।"[170]

**"शाब्दिकै: सा स्मृतैकैव त्रिविधापि स्वरादिवत्।**
**अभिधा लक्षणा व्यक्तिरित्याख्यात्रितयं मतम्॥"**[171]

**"विविधा वृत्तिरेकैव वैलक्षण्येऽपि वस्तुत:।**
**इत्याहु: शाब्दिकास्तेषां भिन्नत्वे गौरवाद्द्वयम्॥"**[172]

यथैक एव स्वरो ह्रस्वदीर्घप्लुतभेदेन त्रिविधो भवति तथा शक्तिरेव शब्दवृत्तिरभिधालक्षणाव्यञ्जनाभेदेन त्रिविधा भवति। वृत्तीनां भेदे गौरवमस्ति।

अत्र वैयाकरणा: – **"शक्तिरेव शब्दवृत्ति:, तस्याश्च प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेश:, व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारादिति।"**[173] एवं च शाब्दिका व्यञ्जनावृत्तिं नाभ्युपगच्छन्तीति वैयाकरणामतमभ्यूह्य प्रत्याख्यातमाशाधरभट्टेन कोविदानन्दे त्रिवेणिकायां च। तस्यायं भाव: स्याद्यद्भाष्यादिप्राचीनतमेष्वाकरग्रन्थेषु क्वचिदपि व्यञ्जनाविषयको विशिष्टविचारो नोपलभ्यते। टीकादिग्रन्थेषु च 'वृत्तिश्च शक्तिलक्षणाऽन्यतररूपा' इत्येव लिखितम्, न तु व्यञ्जनाभिप्रायेण 'अन्यतमरूपा' इति। लक्ष्यार्थस्थ माणवकादेर्नियतोपस्थितिकत्वाभावेन सिंहादिपदरूपप्रातिपदिकार्थत्वाभाशङ्कां मनसि निधाय 'अन्वयानुपपत्तिपूर्विका लक्षणा पदे एव'[174] इत्येव शेखरकारेणोक्तम्, न तु व्यञ्जनास्थलेऽपि शङ्कासमाधाने समुद्भाविते। व्यञ्जनास्वीकारे तु तत्रापि नियतोपस्थितिकत्वाभावे तयोरुद्भावनमवश्यं कर्तव्यमासीत्।

यद्यपि स्फोटवादे ये श्रद्दधते, तैरवश्यं व्यञ्जनाङ्गीकर्तव्या। अन्यथा सकलशाब्दिकाभिमता तस्य व्यङ्ग्यता नैव सिद्धा भवेत्। अत एव नागेशभट्टेन व्यञ्जनास्वरूपं प्रदर्श्योक्तम् - **'अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च**

[170] वैयाकरणसिद्धान्तलघुमञ्जूषा
[171] कोविदानन्द:, श्लो. 42
[172] तत्रैव, श्लो. 19
[173] त्रिवेणिका, पृ. 37
[174] लघुशब्देन्दुशेखर:, पृ. 519

**हर्यादिभिरुक्ता। द्योतकत्वञ्च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामपि तत्स्वीकार आवश्यकः'**[175] इति। तथापि तार्किकेषु शाश्वतिकविरोधानां शाब्दिकानां तार्किकमतप्रत्याख्यानमात्रफलको व्यञ्जनासमर्थनप्रयासो भवेत्। अन्यथा लक्षणायाः प्रत्याख्याने **"जघन्यवृत्तिकल्पनाया अन्याय्यत्वात्, वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्, सति तात्पर्ये 'सर्वे सर्वार्थवाचकाः' इति भाष्याल्लक्षणाया अभावाच्च"**[176] इत्यादयो यावन्तो हेतवो नागेशेन प्रदर्शितास्ते सर्वेऽपि व्यञ्जनां कथं न विरुन्ध्युः।

व्यञ्जनाया यावानर्थो व्यङ्ग्यो भवति, तावान् सर्वोऽप्यप्रसिद्धशक्त्या व्यक्तो भविष्यति। व्यञ्जनावृत्तौ श्रद्धामावहतामालङ्कारिकाणां मते सहृदयैरेव व्यङ्ग्योऽर्थोऽवगम्यते, तादृशोऽर्थोऽप्रसिद्धशक्त्या वैयाकरणैर्भोत्स्यते, किं व्यञ्जनया? तथा चोक्तं नागेशेन **"शक्तिर्द्विधा प्रसिद्धा, अप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्, सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्। ननु सर्वे सर्वार्थवाचका इति ब्रूषे चेत्, तर्हि घटपटात् घटप्रत्ययः किन्न स्यादिति चेत् न; सति तात्पर्ये इत्युक्तत्वात् तात्पर्याभावादिति गृहाण। तात्पर्यञ्चात्रैश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति सर्वं सुरूढम्"**[177] इति।

एवं च यथा लक्षणास्थले तात्पर्यवशादप्रसिद्धया शक्त्यैवेष्टार्थस्य लाभस्तथा व्यञ्जनास्थलेऽपि वक्त्रादिवैशिष्ट्यसहकारेणाप्रसिद्धशक्त्यैवेष्टार्थलाभो भविष्यति, किं व्यञ्जनया? यदि हर्यादिभिर्निपातानां द्योतकत्वस्वीकारात् स्फोटस्य व्यङ्ग्यत्वस्वीकाराच्च शाब्दिकैर्द्योतकतारूपा व्यञ्जना स्वीक्रियते, तर्हि प्रादीनां द्योतकत्वाङ्गीकारान्नैयायिकैरपि सा स्वीकर्तव्या भवेत्, न च तैः स्वीक्रियते। यद्यन्यदेव व्यञ्जकत्वं तेषां तर्हि शाब्दिकानामपि तदन्यदेवास्ताम्, किं लक्षणाभेदेनाधिकतास्वीकारगौरवेण। एवञ्च शाब्दिकानां व्यञ्जनायामनास्था प्रतीयत इति वेद्यम्॥

## सन्दर्भग्रन्थसूची


1. पातञ्जलमहाभाष्यम्, सम्पा. श्रीभार्गवशास्त्रीजोशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 1987
2. पाणिनीयः अष्टायायीसूत्रपाठः, सम्पा. ब्रह्मदत्तजिज्ञासुः, रामलालकपूरट्रस्ट, बहालगढ़, वि.सं. 2058
3. वैयाकरणसिद्धान्तलघुमञ्जूषा, नागेशभट्टः, चौखम्बा संस्कृत सीरीज, वाराणसी, 1925
4. काशिका न्यासपदमञ्जरीसहिता, तारा प्रिन्टिंग वर्क्स, वाराणसी, प्रथमसंस्करणम्, वि.सं. 2043
5. वाक्यपदीयम्, सम्पा. रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1991
6. परमलघुमञ्जूषा, नागेशभट्टः, बरोडा संस्कृतमहाविद्यालयः, बरोडा, 1961
7. अर्थविज्ञान और व्याकरणदर्शन, डॉ. कपिलदेव द्विवेदी, हिन्दुस्तान एकेडमी, इलाहाबाद, 1951
8. वैयाकरणभूषणसारः, कौण्डभट्टः, ज्योतिषप्रकाशप्रेस, काशी, 1965


[175] वैयाकरणसिद्धान्तलघुमञ्जूषा
[176] परमलघुमञ्जूषा, लक्षणानिर्णयः
[177] तत्रैव





# लक्ष्मीस्वयंवरसमवकारे रसविमर्शः

रबिन्द्रनाथबारः[178]

**प्रमुखशब्दाः** लक्ष्मीस्वयंवरसमवकारः, वैदिकवाङ्मये रसः, लौकिकवाङ्मये रसः, रसस्वरूपम्, रससम्प्रदायः, शृङ्गाररसः, हास्यरसः, वीररसः, शान्तरसः।

**शोधसारः-**रससम्प्रदायस्य प्रवर्तकः भवति भरतमुनिः। तेन रसस्वरुपनिरूपणाय स्वीये रससूत्रे सूत्रितं यत्-विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। ततः दर्शनाचार्याः तत्तद्दर्शनानुसारम् अस्य सूत्रस्य व्याख्यामकुर्वन्। तत्र केचन नैयायिका, केचन् वेदान्तिनः, केचन् मीमासकाः केचन् द्वैतिनः। तत्र नैयायिकः श्रीशङ्कुकः रसानुभूतिरनुमितिजन्येति प्राप्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्यो अनुमितः स्थास्यते रसः अनुकार्यं नटादौ यत्र गृहितैः विभावादयनुकार्यभिन्न नटे रसस्यानुमानं क्रियते। वेदान्तानुसारी भट्टनायकः काव्यं भावकत्वभोजकत्वनाम्नी द्वे स्वतत्रे शक्ती अनुपगम्येते प्रक्षुषकयोः साधारणी भावजन्यो अयमिति मनुते स्म। एतन्मते रसास्वादः ब्रह्मास्वादसहोदरः। काव्यानन्द-ब्रह्मानन्दयोः अवश्यमेव भेदः यत् काव्यानन्दे चैतन्यं विषयस्थ भवति न तु ब्रह्मानन्दे। मीमांसकानुसारिणः भट्टलोल्लटयोत्पत्तिवादानुसारं विभावादिकारणैस्सहृदयम-यन्त्यादिदर्शनजन्य नलादिसमवेतरन्युद्बोधस्य स्थायिभावस्य तत्कार्यकटाक्षादिसञ्चारी-तोत्कण्ठादीनाञ्च अनुकार्य नलादिनैव सम्बन्धात्तत्रैव रसमुत्पद्यत नटे तु तत्तदनुकृत्य सादृश्यमूलकारोपी विधीयते। साम्प्रतम् आधुनिकसाहित्ये एकादशरसाणाम् एव गणना क्रियते। यथा शृङ्गार-हास्य-करूण-रौद्र-वीरः-भयानक-बीभत्स-अद्भुत्-शान्त-भक्ति-वात्सल्यरसाः च। अस्मिन् शोधप्रबन्धे वेङ्कामात्यप्रणीतः लक्ष्मीस्वयंवरसमवकारे नैकाः रसाः वर्णनमस्ति।

रसः शब्दः 'रस्' धातोः 'अच्' प्रत्ययान्ते निष्पद्यते। भारतीयसंस्कृतवाङ्मयस्यातीव प्राचीनेषु शब्देषु रसशब्दोऽयमन्यतमः। पुनः रसशब्दस्य जले, वीर्ये, शृङ्गारादौ, विषे, द्रवादौ च प्रयोगो दृष्टिपथमवतरति। यथोक्तं हेमकोशे-

रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे।
बत्ने रागे गृहे धातो तिक्तादो पारदेऽपि च॥[179]

वेदवेदाङ्गादिषु शतशः प्रयुक्तं रसशब्दमवलोक्य निःसन्दिग्धतयेदं वक्तुं शक्यते यदा यजुर्वेदीयलौकिकरसाःकाव्यशास्त्रीयालौकिकरसाश्च वेदरत्नाकरादेव आविर्भूता इति। वैदिकवाङ्मये लौकिकवाङ्मये च रसशब्दः भिन्नार्थे प्रयुक्तः।

- **वैदिकवाङ्मये रसः -**

१- मधुरार्थे - स्वादु रसो मधुपेयोवराय।[180]

[178] VILL+P.O- DUBDA, P.S - EGRA, DIST- PURBA MEDINIPUR, WEST BENGAL- 721448
[179] . हे.को. पृ-७२
[180] . ऋ.वे. ६.४.४४/२२

२- सोमरसार्थे - सोमो अर्षति धर्णसिर्दधान इन्द्रिय रसम्।[181]

३- दुग्धार्थे - यो नो रसं दिणसति पीत्वा अग्रे यो अश्वानां यो गवां भरतनूनाम।[182]

४- जनार्थे - रसेन समगंस्महि।[183]

५- षड् ऋतुणाम् - नमो वः पितरो रसाय।[184]

६- दधि–मधु–घृतादिशब्दार्थे - तां रसोनाभिर्धताम्।[185]

७- शोणितार्थे-या रसस्य हरणाय।[186]

८- प्राणार्थे - प्राणो वा अङ्कानां रसः।[187]

९- सूक्ष्मार्थे- येन रूपं रसं गन्धं शब्दान्स्पर्शश्च मैथुनात्।एतेनैव विजानाति किमत्र परिशिष्यते एतद्वेतत्।।[188]

१०- आध्यात्मिकार्थे - मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्पः आकाशात्मा सर्वकार्मा सर्वकामः सर्वगन्धः। सर्वरस...।[189]

११- तैत्तिरीयोपनिषदि - रसौ वै रसः। रसः हेयेवायं लब्ध्वानन्दी भवति।[190]

१२- काव्यात्मत्वेन - यः वानु वै रसस्तावानात्मा।[191]

१३- साखानतत्वार्थे - गायत्रयादीनि छन्दांसि हि रसः। आद उ वे रसः।[192]

➢ **लौकिकवाङ्मये रसः -**

१- रामायणे रसः - संस्कृतवाङ्मये आदितकाव्यम् उपजीव्यकाव्यं च रामायणम्। महर्षि वाल्मीकेः करुणरसमयी वाणी वस्तुतः रामायणस्य रचनायाः स्त्रोतः।

मा निषाद ! प्रतिष्ठांस्त्वमगमश्शाश्वताः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।[193]

स्वयं ऋषि उक्तवान् श्लौकस्य कारणं शोक एव -

शोकार्तस्य प्रकूतो मे श्लोकः भवतु नान्यथा।[194]

रामायणे नवरसाणाम् उल्लेखः वर्त्तते।

पाठ्ये गाने च मधुरं प्रमाणैस्त्रिभिरन्वितम्।

181 . ऋ.वे. ९.२.२३/५
182 . ऋ.वे. ७.२३/२३
183 . ऋ.वे. १. २३/२३
184 . य.वे. २/३२
185 . अ.वे. ६.६७/१
186 . अ.वे. १.८.३
187 . वृ.उ. १.३.१९
188 . क.उ. ४/३
189 . छा.उ. ३/२
190 . तै.उ. ३/७
191 . श.ब्रा. ७.२.३/४
192 . श.ब्रा. ७.३.१
193 . रामा. १/२/१५
194 . रामा. १/२/१८



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

जातिभिः सप्रभिर्बद्धं तन्त्रीलयसमन्वितम्।।[195]
रसे श्रृङ्गारकरुणहास्यरौद्रभयानकैः।
वीरादिभिश्च संयुक्तं काव्यमेतदग्रायताम्।।[196]

आनन्दवर्धनेन उक्तम् रामायणे हि करुणरसः स्वयमादिकविना सूचितः।

काव्यस्वात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्वबियोगोत्थश्शोकः श्लोकत्वमागतः।।[197]

२- निरुक्ते रसः – निरुक्ते यास्कः रसशब्दस्य प्रयोगं जल-तुषार-दुग्ध-किरणार्थेषु कृतवान्।

३- व्याकरणशास्त्रे रसः -

पाणिनीयव्याकरणे रसशब्दः धात्वर्थे तथा आस्वादनार्थे तथा स्नेहार्थे प्रयुक्तः। व्याकरणशास्त्रे रसशब्दव्युत्पत्ति अनेन प्रकारेण भवति। रस्यते आस्वादयते इति रसः। रसाति रसयति वा रसः। रसनं रस आस्वादः रस्यते अनेन इति रसः।

४- आयुवेदशास्त्रे रसः - यास्कमहामुनिः रसविषये एवं लिखति- रसनार्थे रसस्तस्य द्रव्यमापः क्षितिस्तथा।[198]

➢ **रसस्वरूपम् -**

रससिद्धान्तस्य प्रवर्तकः आचार्यभरतमुनिः "नहि-रसादृते कश्चिदर्थः प्रवर्तते।[199] इत्युक्त्वा स्फुटीकृतवान् यत् काव्ये वर्णितमेतादृशं किमपि वस्तु नास्ति यत् रसवर्जितं स्यात्। यथाहि आत्मतत्वज्ञः परमात्मनो दर्शनं कृत्वा अपूर्वानन्दसन्देहनिमग्नो जायते तथैव काव्यमर्मज्ञाः सहृदयाः ब्रह्मानन्दसहोदरानन्दप्रदं रसमास्वाद्य आनन्दसागरे निमग्नाः जायन्ते।

रससम्प्रदायस्य प्रवर्तकः भवति भरतमुनिः। तेन रसस्वरुपनिरूपणाय स्वीये रससूत्रे सूत्रितं यत्- विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।[200] तत दर्शनाचार्याः तत्तत् दर्शनानुसारम् अस्य सूत्रस्य व्याख्यामकुर्वन्। तत्र केचन नैयायिका, केचन वेदान्तिनः, केचन मीमासकाः केचन द्वैतिनः। तत्र नैयायिकः श्रीशङ्कुकः रसानुभूतिरनुमितिजन्येति प्राप्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्यो अनुमितः स्थास्यते रसः अनुकार्यं नलादो यत्र गृहितैः विभावादयनुकार्यभिन्न नटे रसस्यानुमानं क्रियते। वेदान्तानुसारी भट्टनायकः काव्यं भावकत्वभोजकत्वनाम्नी द्वे स्वतत्रे शक्ती अनुपगम्येते प्रक्षुषकयोः साधारणी भावजन्यो अयमिति मनुते स्म। एतन्मते रसास्वादः ब्रह्मास्वादसहोदरः। काव्यानन्द-ब्रक्ष्मा-नन्दयोः अवश्यमेव भेदः यत् काव्यानन्दे चैतन्यं विषयस्थपं भवति न तु ब्रह्मानन्दे। मीमांसकानुसारिणः भट्टलोल्लटयोत्पत्तिवादानुसारं विभावादिकारणैस्सहृदयम-यन्त्यादिदर्शनजन्य नलादिसमवेतरन्युद्बोधस्य स्थायिभावस्य तत्कार्यकटाक्षादिसञ्चारी-तोत्कण्ठादीनाञ्च अनुकार्य नलादिनैव सम्बन्धात्तत्रैव रसमुत्पद्यत नटे तु तत्तदनुकृत्य साद्दश्यमूलकारोपी विधीयते।

195 . रामा. १/४/८/७
196 . रामा. १/४/८/९
197 . ध्व.लो. १/५
198 . च.सं. १/६३
199 . ना.शा. ६/३२
200 . ना.शा. ६/३३

मम्मटेनापि काव्यप्रकाशग्रन्थे रसलक्षणम् एवं प्रतिपादितम्-

कारणान्यथ कार्याणि सहकारीणि यानि च।

रत्यादिः स्थायिनो लोके तानि चन्नाट्यकाव्ययोः॥

विभावानुभावास्तत्कथ्यन्ते व्यभिचारिणः।

व्यक्तः स विभावाद्यैतै स्थायीभावोः रसः स्मृतः॥[201]

विश्वनाथेन उक्तं साहित्यदर्पणे-

विभावेनानुभावेन व्यक्तः सञ्चारिणं स्तथा।

रसतामेति रत्यादिः स्थायिभाव सचेतसाम्॥[202]

धनञ्जयेन उक्तं दशरूपके-

कीडतां मृणमयैर्यद्वत् बालानां द्विरदादिभिः।

स्वोत्साहः स्वदते तद्वच्छातृणामर्जुनादिभिः॥

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।

अनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः॥[203]

- **रससम्प्रदायः -**

यद्यपि राजशेखरेण काव्यमीमांसायामुक्तं यत्-ब्रह्मणा सर्वप्रथम रसस्योपदेशो नन्दिकेश्वराय प्रदकत्तः। अतः स्यात् रसस्य प्रथमं निरूपणं नन्दिकेश्वरेणाकारि न तु भरतमुनिना। किन्तु संयोगात् तन्निमितो रससिद्धान्तविषयको ग्रन्थो नाद्यावधि समुपलब्धो अस्माभिः। यद्यपि वैदिकसाहित्ये रसादिशब्दनामुल्लेखो मिलति परमालङ्कारिकपरम्परायां रसादिस्वरूपनिरूपेण नाट्यशास्त्रकर्ता भरतमुनिरेव प्राथम्येन गण्यते। भरतमुनेः पूर्वमपि रसपरम्परा आसीदिति सत्यं,किन्तु तदानीन्तनस्य कस्यचिदपि ग्रन्थस्य तदग्रन्थकर्तुश्च प्राप्याभावात् आचार्यभरतादेव रससम्प्रदायस्यारम्भः स्वीक्रियते।

- **रसभेदाः –**

प्रथमतः रसः लौकिकः अलौकिकश्च भवति। वासनारूपरत्यादिभावानां संस्कारोद्बोधः लौकिकसयोगेन लौकिकरसः भवति। अलौकिकसंयोगेन अलौकिकरसः कथितः। रसभेदविषये नवरसाः, दशरसा, द्वादशरसाः इति वादाः परिलक्ष्यन्ते। परन्तु श्रृङ्गारप्रकाशे श्रृङ्गार एव एको रसः इति स्वीक्रियते।

आलङ्कारिकः भोजः वदन्ति यथा -

वीराद्भुतादिषु चे येह रसप्रसिद्धिः

सिद्धा कुतोऽपि वटयक्षवदाविभाति।

लोके गतानुगतिकत्ववशादुपेत

[201] . का.प्र. १/२७-२८

[202] . सा.द. ३/१

[203] . द.रू. ४/९-१०



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

मातां निर्वतयितुमेव परिश्रमो नः॥[204]

तथैव भवभूतिरपि करुणरसः एक एवरसः इति मनुते तदुक्तम् -

एको रसः करूण एव निमित्तभेदाद्

भिन्न पृथग्पृथागिवाश्रयते विवत्तीन्।

आवर्तबुद्बुदतरङ्गमयान्विकारान्

आम्भो यथा सलिलमेव तत्समस्तम्।[205]

एवमेव केचनचार्याः नवरसान् स्वीकुर्वन्ति। पुनश्च रसाः दश इत्यपि कैश्चिदक्तम्। तेषामभिप्रायः श्रृङ्गारादिनवरसैः सह वात्सल्ययोऽपि रसः। केचन भक्तिरसं स्वीकृत्य एकादश इति वदन्ति। कतिपयाचार्यैः आर्दताभिलाष श्रद्धास्पृद्दादीश्चतुरो रसान् मत्वा नवरसांश्च मेलयित्वा त्रयोदश रसाः व्यवह्रियन्ते।

परन्तु साम्प्रतम् आधुनिकसाहित्ये एकादशरसाणाम् एव गणना क्रियते। यथा श्रृङ्गार-हास्य-करूण-रौद्र-वीरः-भयानक-बीभत्स-अद्भुत्-शान्त-भक्ति-वात्सल्यरसाः च।

- **लक्ष्मीस्वयंवरसमवकारे प्रयुक्ताः रसाः -**

- **श्रृङ्गाररसः -** श्रृङ्गारस्य लक्षणं साहित्यदर्पणानुसारं यथा-

श्रृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।

उत्तमप्रकृतिप्रायो रसः श्रृङ्गार ईष्यते॥[206]

श्रृङ्गमृच्छतीति श्रृङ्गारः। श्रृङ्गं नाम कामुकयुगलयोरूत्पीडकम्। अनेन कामोद्भवेन यः सम्भूयते सः श्रृङ्गारः इत्युच्यते। अस्य रसस्यालम्बनविभाव उत्तमप्रकृतिको नायकः। परकीया अनुरागशून्या वेश्यानायिका अस्य आलम्बनानि न भवन्ति। तद्भिन्ना नायिकास्तथा च दक्षिणनायका अस्योपायियुक्तमालम्बनानि, चन्द्र-चन्द्रिका-चन्दनानुलेपन-भ्रमरझङ्कारौदयउद्दीपनविभावा, भ्रुविक्षेप-कटाक्षादयोऽनुभावाः, औग्र्य-मरण-आलस्य-जुगुप्सादिव्याभिचारिभावान् विहाय अन्ये चास्य पोषकाः भवन्ति। रतिरस्य स्थायिभावः। वर्णः श्यामो देवता च विष्णुः, सम्भोगः, विप्रलम्भश्चेति अस्य द्वौ भेदौ स्तः।

अस्योदाहरणं यथा लक्ष्मीस्वयंवरसमवकारे -

सा मय्यस्त्यनपायरागभरिता यद्यप्यसाधारणी

पातिव्रत्यदशास्ति यद्यपि तथा तस्याः मयि प्रत्ययः।

जानीते मन एतदप्यविकलं मानोदयो बाधते माया सम्प्रति मयिनामपि परं किं वाऽऽद्य वक्ष्येऽपरम्॥[207]

अत्र माधवात्मनः रतेः आश्रयस्य रमाविषयकत्वेन उपस्थितस्य आलम्बनस्य तदीयगुणस्वभावादिविचारजनितस्योद्दीपनस्य मानोदयो बाधते इत्यादि वाक्यसमाक्षिप्तस्य मखनिवर्णतादि अनुभावस्य दैन्यादिरूपस्य व्यभिचारीणः संयोगात् माधवनिष्ठविप्रलम्भशृङ्गारस्य प्रतीतिर्जायते। एवमेवात्र केचन यथा -

[204] . श्रृ.प्र. १/१२

[205] . उ.रा. ३/४७

[206] . सा.द. ३/१८३

[207] . ल.स्व,स. १/१९

पूजा या विधिरूद्रमुख्यविहिता सा चारतेर्भाजनं   या दीनावनचातुरी परिणतिः सा चाद्य दूराहिता।
या सर्वश्रुतिशेखरैकवसतिस्सा चापि नो रोचते   या सर्वज्ञ इति प्रथाऽपि यदि मे सा च व्यथाभागिनी॥[208]

पुनश्च –

या नो मुञ्चति मामन्यशरणा प्रेमानुबन्धोज्ज्वला
यस्या नर्मकृतः क्षणं च विरहः कल्पान्तदायी मतेः।   सा देशान्तरमेत्य जीवति परस्तां काङ्क्षते त्वद्गिरा
लक्ष्मीर्मय्यनुरागिणीति तदहो लज्जाकुलं मे मनः॥[209]

पुनश्च –

आहारोऽपि न रोचते बुधजनैराराधने निर्मितः
स्वैरारामविहाररीतिरपि मे दूराध्वचारायते।
व्याहारश्शुकशारिकानिगदितस्सूते कटुत्वं श्रुतौ
ताद्दक्द्विरहासहिष्णुमनसा व्याप्तौ गुणव्यत्ययः॥[210]

- **हास्यरसः -**

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हास्यो हास्यस्थायिभावः श्वेतः प्रमथदैवतः॥[211]

यत्र अभिनेतुः आकारविकृतिः, वाग्विकृतिः, वेषविकृतिः, चेष्टाविकृतिरथवा अन्यविकृतयो वर्णिताः भवन्ति। अथवा ताभिः विकृतिभिः अभिनयोः भवति तत्र हास्यरसोऽभिव्यज्यते। अस्य स्थायिभावो हास्यः। वर्णः श्वेतः, देवता प्रमथगणः, वचन चेष्टाः विकृतश्च आलम्बनविभावाः। नेत्रनिमीलनम्, मुखविकासादयश्चानुभावाः। निद्रा-आलस्य अवस्थित्थादयः व्यभिचारिभावाः भवन्ति। एवमेतेषां विभावानुभावव्याभिचारिभावानां संयोगात्। हासाख्यः स्थायिभावः रसरूपेण यत्र अभिव्यज्यते तत्र हास्यरसः। अस्य षड्भेदाः उच्यन्ते। यथा- (1)उत्तमप्रकृतिगतः स्मितहास्यः (2)उत्तमप्रकृतिगतः हसितहास्यः (3)मध्यमप्रकृतिगतः विहसितहास्यश्च। (4)मध्यमप्रकृतिगतः अवहसतिहास्यः (5)अधमप्रकृतिगतः अपहसितहास्यः (6)अधमप्रकृतिगतः अतिहसितहास्यश्च। नेन्नयोर्विकासोऽधरस्य स्पन्दनं “स्मित” इत्युच्यते। दन्तानां सामान्यदर्शनं “हसितहास्य”, येन चक्षुर्भ्यामश्रुधारा प्रवहति तत् “विहसितम्” येन स्कन्धः शिरश्च कम्पेते तत् “अवहसितम्”, येन चक्षुर्भ्यामश्रुधारा प्रवहति तत् “अपहास्थम्” येन हस्तापादानां वेगन सञ्चालनं क्रियते तत् “अतिहसितम्” इत्युच्यते।

अस्योदाहरणं यथा लक्ष्मीस्वयंवरसमवकारे –

अनुसरति सुरसमाजं अनुवर्तते दानवादिकं स्वजनम्।
उभयभ्रष्ठ एष केन पुनः श्लाघनीयविभवाढ्यः॥[212]

208 . ल.स्व,स. १/२०
209. ल.स्व,स. १/४६
210 . ल.स्व,स. १/३५
211 . सा.द. ३/२१४
212 . ल.स्व.स. २/२०





अत्र निर्झतिरूपस्यालम्बस्य तदीय विकृतरूपदर्शनजन्यस्य उदीपनस्य करचालनादिकस्य अनुभावस्य चपलादि रूपस्य व्यभिचारिणः संयोगात् निर्झतिनिष्ठ हासस्यायिकः हास्यरसः प्रतीतिपदमवतरति। एवमेवात्रकश्चन यथा –

सुरभूरूह एव पुष्पवाटी
मणिरस्यामर एव रत्नपेटी।   पुर एव वसत्यजस्रगणया   सुरराजस्य सुखानुभूतिकोटि॥[213]

- **वीररसः -**

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदैवता हेमवर्णोऽयं समुदाहृतः॥[214]

यत्रोत्साहः स्थायिभावो भवति तत्र वीररसो ध्वन्यते। उत्तमप्रकृतिकः जनोऽस्याश्रयः, वर्णः सुवर्णः, देवता महेन्द्रः, आलम्बनं विजेतव्यः शत्रुः, उद्दीपनं शत्रोश्चेष्टाः, अनुभावाः युद्धदिसामग्र्योऽथवा अन्यान्यसाधनानामन्वेषणं, धृति-मति-गर्व-स्मृति-तर्क-रोमाञ्चाः व्यभिचारिभावाः भवन्ति। अस्य रसस्य चत्वारो भेदाः उच्यन्ते। यथा(1)दानवीरः (2)धर्मवीरः (3)युद्धवीरः (4)दयावीरश्च।

उक्तं च लक्ष्मीस्वयंवरसमवकारे -

गरुन्मरुदनीकिनीपरिविधूतसालावलिं
प्रचण्डमुखघट्टनव्यथितधूतयादोगणम्।
पदाग्रदलिताखिलक्षितिधरासृताम्बुच्छटं
विधाय जलधिं बलादहमुपाहरिष्यामि ताम्॥[215]

अत्र गरुन्मदात्मनिष्ठस्य उत्साहस्थायिकस्य तन्निष्ठत्वेन वर्तमानस्य आलम्बनस्य अभीष्ठजनानिष्ठदर्शनरूपस्योद्दीपनस्य गरुन्मरुदनीकिनी इत्यादि समाक्षिप्तस्य पक्षोद्वयेन मुखघट्टनादिरूपस्य अनुभावस्य मदधृत्यादि रूपस्य व्यभिचारिणः संयोगात् गरुन्मनोनिष्ठ वीररसः सहृदयमनोनिष्ठसाधारणी कृति महिम्ना तदात्मनि आस्वाद्यते। एवमेवात्रकेचन यथा –

भो भो भुज ! प्रशममेहि ममेह यावदाभाति वारिधिपताववनीयबुद्धिः।   तेनेव चेद्वयमुपेक्ष्यति पक्षपातृन्नूनं तदीयदमने
भवसि स्वतन्त्रः॥[216]

पुनश्च -

गत्वा स्वयंवरमहोत्सवदर्शनाय
कृत्वा सुरासुरं चमूं न च पूजानार्हाम्। हत्वा प्रियामनुसृतिप्रवणामनन्यां   छित्वा व्यथां हृदयजां शममेति तूर्णम्॥[217]

पुनश्च –

यद्दोर्दण्डविजृम्भिशम्वविदलत्पक्षाः पुरा भूधराः  विदुत्याब्धिममूं सदा शरणयन्त्यन्तर्जले यन्त्रिताः।
सर्वेषामपि यस्सुपर्वसदासामग्रेसरश्श्रीकरः

213 . ल.स्व,स. २/१६
214 . सा.द. ३/२३२
215 .  ल.स्व,स. १/२१
216 . ल.स्व,स. १/२५
217 . ल.स्व,स. १/४७

सोऽयं दीव्यति मञ्चसीमनि शचीकौमारहारी हरिः॥[218]

- **शान्तरसः -**

शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मत।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः॥[219]

यस्य शमः स्थायिभावोऽस्ति सः शान्तरसः। उत्तमप्रकृतिका जना एव अस्य रसस्यास्वादनं कुर्वन्ति। अस्य वर्णः कन्दपुष्पस्य चन्द्रस्य च सुन्दरच्छाया इव धवलो भवति। देवता अस्य नारायणः। संसारोऽनित्यः आधिभौतिक-आध्यात्मिक-आधिदैविकादिदुः खमयोऽस्तीति विचिन्त्य सांसारिकविषयान् प्रति अरूचिः तेषा निसारतायाः ज्ञानं परमात्मनः स्वरूपज्ञानं च शान्तरसस्यालम्बनविभावाः पवित्राश्रम्, भगवतः, लीलाभुमि, तीर्थस्थान, रम्यकाननय साधुसंगतिश्चादयः अस्योद्दीपनविभावाः.रोमाञ्च दया संन्यस्ततादयः अनुभावा कथयन्ते। निवेदः, हर्षः, मरणं, मतिः, धृतिः, भूतदया, औस्सुक्यादयो व्यभिचारिभावाः सन्ति।

उक्तं च लक्ष्मीस्वयंवरसमवकारे -

भूमिस्सदा भवतु सम्भृतसस्यजाता    नाथा भवन्तु निजधर्मरताः पृथिव्याः।
साहित्यसम्पदभिवृद्धिमुपात्त लोकाः
सर्वान् सुखयतु क्षपितान्त रायाः॥[220]

- वात्सलरसः -

अस्य स्थायीभाव वत्सलतारतिः आलम्बनं पुत्रादि। आलिङ्गनम्, अङ्गसंस्पर्श, शिरश्चुम्बनं पुलकाङ्कुरा, आनन्दबाष्पादयः, अनुभावा। अनिष्टाका ईतयः व्यभिचारिणः। लक्ष्मीस्वयंवरसमवकारे पुत्र्यां रमायां वरुणस्य वात्सल्यं स्पष्टतया अभिव्यज्यते। एवमेव देवीनामपि रमायाः विषये या रतिः सापि वात्सल्यस्थायिभावरूपा अस्ति।

- **भक्तिरसः –**

भक्तःभागवगुणश्रवणमननादिभि प्रापञ्चकाभावं प्राप्य शुद्धचैतन्यस्वरूपे परमात्यनि तिष्ठति प्रह्लादीनामित। तदा तेन भक्तिरसो अनुभूयते। भगवद्विषयकरतिस्थायिभावः ज्ञानाभावौः सम्मेलनेन भक्तिरसः भवति। एवं भक्तिरसः शान्तप्रीतिप्रेयो-वात्सल्य-मधुर-हास्य-अद्भुतादि-द्वादशभेदैः विभाजते। लक्ष्मीस्वयंवरसमवकारे नायकः माधवः स्वयमेवपुरुषोत्तम् अस्ति। अतः तमधिकृत्य सम्पूर्णमिदं रूपकं भदवतोमाधवस्य आराधनास्वरूपमेव। अपि च तृतीयेऽङ्के सर्वेऽपि देवाः विवाहमहोत्सवे सङ्गताः दृश्यन्ते। मल्लिकाचूडः कुवलयापीडश्च तत्तद्देवानां स्तुतिं कुरुतः अत्र सर्वत्र भक्तिरसोनुभूयते। सर्वेषां देवानां माधवे समादरः अवलोक्यते। अतएव माधवस्य पुरुषोत्तमत्वम् अभिव्यज्यते। एवं भक्तिरसोऽपि अनुभूयते।

प्रायः सर्वेरसाः अङ्गरूपेण काव्येऽस्मिन् दृश्यते। समवकारे वीररसस्य अङ्गीत्वम् उक्तं वर्तते। अत्रापि माधवस्य दानवदमनं वीररसमेव प्रकाशते। धीरोदात्तस्य माधवस्य स्वभावः उत्साहपूर्णा वर्तते। सर्वेभ्यऽपि देवेभ्यः गम्भीरस्वभावेन असौ अग्रेगन्या अस्ति। लक्ष्मीस्वयंवरमहोत्सवे आगताः देवाः माधवस्य दर्शनम् अभिकान्क्षन्त्यः आसन्। कदापि ते

[218]. ल.स्व,स. २/२५
[219]. सा.द. ३/२४५
[220]. ल.स्व,स. ३/४५



[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

माधवस्य प्रतियोगिनः न आसन्। स्वयंवरानन्तरं माधवः सर्वेभ्यः अनुग्रहान् वितिर्यते। एतेनापि अस्य उत्साहस्थायिभावः वीररसश्च अभिव्यज्यते। वरुणः माधवं मनसि निधाय एव लोकैकवीराय सकलगुणपरिपूर्णाय एव मे पुत्री देया इति निश्चयेन स्वयंवरघोषणां करोति। अतः वीररसोऽत्र मुख्य इति निश्चयेन वक्तुं शक्यते।

एवं लक्ष्मीस्वयंवरसमवकारे यथोचितं रसाः कविना समायोयिताः। अतः न केवलम् अयं लक्ष्मीस्वयंवरः रूपकविशेसस्य समवकारस्य आदर्शमात्रम् अपितु सकलसाहित्यगुणोपेतं काव्यम् अपि अस्ति इति स्पष्टं भवति। काव्यासास्य वैशिष्टेन सह आदर्शसमवकारत्वम् अपि विद्यते।

## सन्दर्भग्रन्थसूची

1.लक्ष्मीस्वयंवरसमवकारः – आर् राघवेन्द्राओ – प्राच्यविद्यासंशोधनालयः – मैसुर – 1987।
2.साहित्यदर्पणः – आचार्यः कृष्णमोहनशास्त्री – चौखम्वा संस्कृत संस्थान – वाराणसी – 2018।
3.ध्वन्यालोकः – आचार्यजगन्नाथपाठकः – चौखम्बा विद्याभवन - वाराणसी – 2014।
4.काव्यप्रकाश – रामानन्द आचार्य – संस्कृत पुस्तक भाण्डार – कलिकाता – 1998।
5.भरतनाट्यशास्त्र - डः सुरेशचन्द्र वन्द्योपाध्याय – नवपत्र प्रकाशन – कलकाता – 2018।
6.दशरूपक – डः सीतानाथ आचार्य - संस्कृत पुस्तक भाण्डार – कलिकाता – 2016।
7.उपनिषद् – गीताप्रेस – गोरक्षपुर – 2013।
8.मूल श्रीमद्वाल्मीयरामायणम् - गीताप्रेस – गोरक्षपुर – 2014।

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-47-48 , YEAR 12, VOL -I, DOI-09-08-22 | Since 2010

**SEND PAPER FOR NEXT ISSUE BY-15-09-2022**

**ONLY THROUGH- https://forms.gle/P16UL4nsgAgE75Cd9**

**CONTACT- +91 945-9456-822**